# ।। प्रकरणम्-२ ।।

# ।। पुराणानां परिचयः ।।


| क्रमः | प्रकरणनाम | पृष्ठसंख्या |
|---|---|---|
| २.१ | प्रास्ताविकम् । | 66-162 |
| २.२ | पुराणानामाविर्भावः । | |
| २.३ | इतिहासपुराणयोर्मध्ये भेदः । | |
| २.४ | पुराणानां लक्षणानि । | |
| २.५ | पुराणस्य दशलक्षणकत्वम् । | |
| २.६ | पुराणानां प्रकारप्रकल्पनम् । | |
| २.७ | महापुराणानां क्रमः । | |
| २.८ | उपपुराणानां विवेचनम् । | |
| २.९ | औपपुराणानां विवेचनम् । | |
| २.१० | पुराणानां विषयाः । | |
| २.१०.१ | आख्यानोपाख्यानानि । | |
| २.१०.२ | गाथाः । | |
| २.१०.३ | कल्पशुद्धिः । | |
| २.११ | पुराणसंहिता - पुराणमितिहासश्च। | |
| २.१२ | पुराणानां श्लोकसंख्या । | |
| २.१३ | पुराणेषु वर्ण्यविषयः । | |
| २.१४ | उपसंहारः । | |

## ।। प्रकरणम्-२ ।।

## ।। पुराणानां परिचयः ।।

### २.१ प्रास्ताविकम् ।

**विस्ताराय च वेदानां स्वयं नारायणप्रभुः ।**
**व्यासरूपेण कृतवान् पुराणानि महीतले[१] ।।**
**जयति पराशरसूनुः सत्यवतीहृदयनन्दनो व्यासः ।**
**यस्यास्यकमलगलितं वाङ्मयममृतं जगत्पिबति[२] ।।**
**स्वसुखनिभृतचेतास्तदव्युदस्तान्यभावो-**
**प्यजितरुचिरलीलाकृष्टसारस्तदीयम् ।**
**व्यतनुत कृपया यस्तत्त्वदीपं पुराणं**
**तमखिलवृजिनघ्नं व्याससूनुं नतोस्मिः[३] ।।**

श्रीहरेरवयवरूपाणि सर्वाणि पुराणानि सन्ति, तद्यथा - ब्रह्मपुराणं भगवतः श्रीविष्णोः शिरः, पद्मपुराणं भगवतो हृदयम् , श्रीविष्णुपुराणं श्रीहरेर्दक्षिणबाहुः, शिवपुराणं वामबाहुः, श्रीमद्भागवतपुराणं ऊरू वर्तेते, नारदपुराणं भगवतो नाभिः, मार्कण्डेयपुराणं दक्षिणा दक्षाङ्घ्रिः, अग्निपुराणं भगवो वामाङ्घ्रिः, भविष्यपुराणं दक्षिणजानुः, ब्रह्मवैवर्तपुराणं वामजानुः, लिङ्गपुराणं भगवतो दक्षिणगुल्फकम् , वराहपुराणं भगवतो वामगुल्फकम् , स्कन्दपुराणं भगवतो लोमानि सन्ति, वामनपुराणं त्वचा, कूर्मपुराणं पृष्ठम् , मत्स्यपुराणं मेदः, गरुडपुराणं मज्जा, एवं ब्रह्माण्डपुराणं

---

1 मत्स्यपुराणम् ५।२

2 वायुपुराणम् १।१।२

3 कल्याण - पुराणकथाङ्कः वर्षम् ६३ पृ. सं. ७

भगवतोऽस्थिरूपात्मकमस्ति, इत्थं भगवान् श्रीविष्णुः पुराणविग्रहरूपे बभूव, यथा - पद्मपुराणकारः पद्मपुराणे विषयमिमं विवेचयन् कथयति यथा -

**वैष्णवं दक्षिणो बाहुः शैवं वामो महेशितुः ।**
**ऊरू भागवतं प्रोक्तं नाभिः स्यान्नारदीयकम्।।**
**मार्कण्डेयं च दक्षाङ्घ्रिर्वामो ह्याग्नेयमुच्यते।**
**भविष्यं दक्षिणो जानुर्विष्णोरेव महात्मनः ।।**
**ब्रह्मवैवर्तसंज्ञं तु वामजानुरुदाहृतः ।**
**लैङ्गं तु गुल्फकं दक्षं वाराहं वामगुल्फकम् ।।**
**स्कान्दं पुराणं लोमानि त्वगस्य वामनं स्मृतम् ।**
**कौर्मं पृष्ठं समाख्यातं मात्स्यं मेदः प्रकीर्त्यते ।।**
**मज्जा तु गारुडं प्रोक्तं ब्रह्माण्डमस्थि गीयते ।**
**एवमेवाभवद्विष्णुः पुराणावयवो हरिः[1] ।।**

इत्थम्भूतस्य श्रीहरेर्विग्रहरूपस्य पुराणस्याढ विर्भावविषयात्मकं विवेचनं करोमि यथा -

२.२ पुराणानामाविर्भावः ।

भारतीयवाङ्मये पुराणानि साहित्यरत्नाकरस्य समुज्ज्वलानि रत्नानि सन्ति, येषां प्रचुरप्रकाशो भारतीयानामन्तःकरणं सृष्टिकालत आलोकितं करोति, अस्य विश्वस्य विशुद्धः समग्रेतिहासो यदि दृग्गोचरो भवति तर्हि सः पुराणेष्वेव उपलभ्यते । दुरूहाणां वेदार्थानां सरला सुमञ्जुला व्याख्या पुराणेषु वर्तते, नूतनायां शैल्यां पुरातनधर्मस्य पक्षं गृहीत्वा पुराणैरधिकं बलं क्रियाकलापेषु प्रदत्तमस्ति,

[1] पद्मपुराणम् -स्वर्गखण्डः ६२।२-७

अतोयमेव प्राचीनवैदिकधर्मः परिवर्तितो भूत्वा पौराणिकरूपे समागतः । भारतीयसंस्कृतवाङ्मये पौराणिकयुगस्याविर्भावो नूतनां दिशां सूचयति, वेदविज्ञानस्य मनोरञ्जकाख्याने परिणतमेव पुराणानामभूतपूर्वं कौशलं वर्तते । वेदमन्त्राणां कौतूहलपूर्वकं माहात्म्यस्य विस्तृतं वर्णनमेव पुराणानां मौख्यं कार्यमस्ति, यथा - ऋग्वेदस्य 'इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्' इति मन्त्रस्य विस्तृता व्याख्या वामनावतारस्य कथा वामनादिपुराणेषु विस्तृतरूपेण वर्णिता यथा -

**विस्ताराय च वेदानां स्वयं नारायणप्रभुः ।**
**व्यासरूपेण कृतवान् पुराणानि महीतले**[१] **।।**

अतो वेदविद्यायाः परिबृंहणमितिहासपुराणानामनुशीलनं कर्तव्यमेव, तद्यथा -

**इतिहासपुराणाभ्यां वेदं समृपबृंहयेत् ।**
**बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति**[२] **।।**

अत एव वेदार्थज्ञाने समेषां पुराणानामुपयोगिता सर्वोपरि वर्तते, पुराणान्यात्मज्ञानस्य विज्ञानस्य च ज्ञाननिधिर्वर्तते, अतः पुराणानां विषये लिखितमस्ति यद् -

**तेषां शश्वत्प्रणादेन भूमिर्दृष्टतनूरुहा ।**
**राज्ञी राज्याभिषिक्तेव पुनर्यौवनमश्नुते**[३] **।।**

---

[1] पुराणतत्त्वविमर्शः पृ. सं. २

[2] पुराणतत्त्वविमर्शः पृ. सं. २

[3] पुराणतत्त्वविमर्शः पृ. सं. ३

इत्थं पुराणानि भारतीयसंस्कृतेः, आचारस्य, इतिहासस्य च ज्ञानाय विश्वकोशोस्ति । इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः, मानवस्याभ्युदयोथवा निःश्रेयससिद्धिर्वेदेनैव भवितुमर्हति, अतो वेदा अलौकिक उपायो वर्तते, मनुष्यैर्निर्मित उपायो लौकिक उपायः, अतो मानवैः रचितेषु ग्रन्थेषु दोषः स्वाभाविकोस्ति, किन्तु वेदस्त्वपौरुषेयः, नैते मानवैः रचिताः सन्ति, परमेश्वरस्य निःश्वासेनानादिरूपा अनन्ताश्च सन्ति, प्रलयकाले वेदाः परमेश्वर एवान्तर्हिता भवन्ति तथा च सृष्टिसमये परब्रह्मपरमात्मनो मुखाविन्दात्प्रादुर्भवन्ति तद्यथा -

**यस्य निःश्वसितं वेदाः यो वेदेभ्योखिलं महत् ।**
**निर्ममे तमहं वन्दे परमानन्दमाधवम्[१] ।।**

एतेषां पुराणानां वेदमूलकत्वविषये नैके मन्त्राः श्लोकाश्च कथयन्ति तद्यथा -

**ऋचः सामानि छन्दांसि पुराणं यजुषा सह ।**
**उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रिताः[२] ।।**
**तमितिहासश्च पुराणं च गाथाश्च नाराशंसीश्चानुव्यचलन्[३]।।**
**इतिहासस्य च वै स पुराणस्य च गाथानां नाराशंसीनां-**
**च प्रियं धाम भवति य एवं वेद[४] ।।**

---

1 पुराणतत्त्वविमर्शः पृ. सं. ४

2 अथर्ववेदः ७१।७।४

3 अथर्ववेदः १५।६।११

4 अथर्ववेदः १५।६।१२

**पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा सह ।**

**अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः[१] ।।**

**इतिहासं पुराणं पञ्चमं वेदानां वेदम्[२] ।।**

**स्वाध्यायं श्रावयेत्पित्र्ये धर्मशास्त्राणि चैव हि ।**

**आख्यानानीतिहासांश्च पुराणानि खिलानि च[३] ।।**

**अष्टादशानां विद्यानामेतासां भिन्नवर्त्मनाम्।**

**आदिकर्ता कविः साक्षाच्छूलपाणिरितिश्रुतिः[४] ।।**

ऋग्वेदं भगवोध्येमि यजुर्वेदं सामवेदमथर्वाणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदम्[५] ।

**स ना पुराणमध्येरात्[६] ।**

**पुराणमोकः संख्यं शिवं याम्[७] ।**

ब्राह्मणानि कल्पगाथा नाराशंसी इतिहासपुराणानि अमृतस्य तुल्याः[८]

स एव बहुश्रुतौ भवति लोकवेदवेदाङ्गविद् वाकोवाक्येतिहासपुराणकुशलः[९] ।

---

1 मत्स्यपुराणम् ५३।३

2 न्यायदर्शनम् ४।१।६२

3 मनुस्मृतिः ३।२३२

4 शिवपुराणम्-वा. सं. १।२७

5 छा. उ. ७।१।२

6 ऋग्वेदः ३।४४।९

7 ऋग्वेदः ३।५८।६

8 आ. गृ. ३।४

9 गौ. सू. ८।४।६

अथ नवमेहनि किञ्चित् पुराणमाचक्षीत्[1] ।

**एवमिमे सर्वे वेदा निर्मिताः ससङ्कल्पाः सरहस्याः सब्राह्मणाः।**
**सोपनिषत्काः सेतिहासाः सान्वख्याताः सपुराणाः[2] ।।**

ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नारांशसीर्मेदाहुतयो देवानामभवन्[3] ।

स यथार्द्रैधाग्नेरभ्याहितात् पृथग्धूमा विनिश्चरन्ति एव वा अरेस्य महतो भूतस्य विश्वसितमेतद् ऋग्वेदो यजुर्वेदः सामवेदोढथर्वाङ्गिरस इतिहासपुराणं पञ्चमं वेदानां वेदम्[4] ।

**पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः ।**
**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश[5] ।।**

अतः संक्षेपेण कथयितुं शक्नुमो यद् - वेदरूपिसागरे पुराणं प्रफुल्लितं कमलमस्ति, तेन विना समुद्रस्य शोभा भवितुमेव नार्हति, पुराणपङ्कजे रसब्रह्म मधु वर्तते, अस्य मधुनो रसास्वादं पुण्यशालिनो भाग्यशालिनश्च विद्वांस एव कुर्वन्ति । इत्थं 'पुराणानामाविर्भावः' इति विषयं प्रस्तूय द्वितीयप्रकरणस्योपप्रकरणमिदमत्रैव समाप्यते ।

२.३ इतिहासपुराणयोर्मध्ये भेदः ।

सम्प्रति को नामेतिहासः ? किन्नाम पुराणम् ? इति विषयस्य चर्चां करोमि तावद् - इतिहासस्य पुराणस्य मध्ये महान् भेदो

---

1 श. ब्रा. ३।१२।१३

2 गो. ब्रा. २।१०

3 तै. आ. २।६

4 बृ. आ. २।४।११

5 याज्ञवल्क्यस्मृति. १।३

वर्तते, इति नाम - इत्थम् , ह नाम - निश्चितमास नाम आसीत् , इत्थं निश्चितमासीत् स एवेतिहासः, निरुक्तकारो यास्काचार्य्यः स्वयमेव इतिहासपदस्य व्याख्यामनेन प्रकारेण करोति, तद्यथा -

**निदानभूतम् इति ह एवमासीत यः कथ्यते स इतिहासः[१] ।**

अर्थाद् इति + ह + आसः इति नाम एवं प्रकारेण ह नाम निश्चितरूपेण, आसः नाम वर्तमान आसीत् । तर्हि तस्यैवेतिहासशब्दस्य पुरावृत्तत्वेन अमरकोशकारस्य महाभारतकारस्य च प्रतिपादनं न तावद् विपरीतं भवति, यथा -

**इतिहासः पुरावृत्तम्[२] ।**

**पुराणम् पुरावृत्तम्[३] ।**

यद्यपि तद् इतिवृत्तम् अर्थशास्त्रे साधारणतया इतिहासार्थेन उपलब्धं भवति, तथापि स्थलविशेषे वेदेषु पुराणेषु च वर्णनानुसारेण स्वातन्त्र्यरूपेण पार्थक्यमस्ति, तद्यथा -

**पुराणमितिवृत्तमाख्यायिकोदाहरणं धर्मशास्त्रं चेति इतिहासः[४] ।**

**तमितिहासश्च पुराणं च गाथाश्च नाराशंसीश्चानुव्यचलन् ।**

**इतिहासस्य च सर्वे पुराणस्य च गाथानां च ।**

**नाराशंसीनां च प्रियं धाम भवति, य एव वेदः[५] ।।**

---

1 निरुक्तभा. टीका, मा. भा. २।१०।३

2 अमरकोशः १।५

3 म. भा. आदिपर्व. नीलकण्ठीटीका

4 कौटिल्यार्थशास्त्रम् ५।१४

5 अथर्ववेदः १।१५।६।११-१२

शतपथब्राह्मणेप्यनयोरितिहासपुराणयोः पृथक्तया चर्चा विशेषरूपेण विहिता वर्तते[१] । तत्र श्रीमच्छङ्कराचार्य्यैरपि यद् अभिमतं दत्तं तस्मादपि अभयोर्मध्ये पार्थक्यं स्पष्टं भवति यथा –

'इतिहास इत्युर्वशीपुरुरवसोः संवादादिः उर्वशीहाप्सराः' इत्यादि ब्राह्मणमेव । पुराणम् । असद्वा इदमग्रमासीदित्यादि[२] ।

इत्थम्प्रकारेण सर्वाणि शास्त्राणि पुराणानि च इतिहासपुराणर्मध्ये पार्थक्यं प्रदर्शयन्ति तद्यथा –

**द्वैपायनेन यत्प्रोक्तं पुराणं महर्षिणा[३] ।।**
**जयो नामेतिहासोयं श्रोतव्यो विजिगीषुणा[४] ।।**
**कृष्णद्वैपायनेनोक्तं पुराणं ब्रह्मवादिना[५]।।**
**अत्राप्युदाहरतीममितिहासं पुरातनम्[६] ।**
**इतिहासप्रदीपेन मोहावरणघातिना ।**
**लोकगर्भगृहं कृत्स्नं यथावत् सम्प्रकाशितम्[७] ।।**
**प्राग्वृत्तकथनं चैव राज्यकृत्यमिषादितः ।**
**यस्मिन् स इतिहासः स्यात्पुरा वृत्त स एव हि[८] ।।**
**इमं यो ब्राह्मणो विद्वानितिहासं पुरातनम् ।**

1 श. ब्रा ११।५।१।१

2 शा. भा. पु. विमर्शधृतम् पृ. ६

3 म. भा. आदिपर्व. १।८७

4 म. भा. उ. पर्व. १३६।१८

5 वायुपुराणम्. १०३।४८-४९

6 मत्स्यपुराणम्. ७२।६

7 म. भा. आदिपर्व. १।८७

8 शुक्रनीतिः. ४।९२

**शृणुयात् श्रावयेद्वापि तथाध्यापयतेपि च ।।**

**धन्यं यशस्यमायुष्यं पुण्यं वेदैश्च समन्तम् ।**

पुराणशब्दस्यार्थो भवति यत् प्राचीनं सदपि नवीनं स्यात् तत्पुराणम् , तथा इतिहासस्यार्थो भवति यः प्राचीनकाले वास्तविकरूपेण घटितघटनायाः सङ्केतं करोति स भवतीतिहासः[१] ।

**परिक्रिया पुराकल्पः इतिहासगतिर्द्विधा ।**

**स्यादेका नायिका पूर्वा द्वितीया बहुनायिका[२] ।।**

धर्मशास्त्रे पुराणशब्दस्य साधारण्येन व्यवहारात् तस्मिन्नेव इतिहासोन्तर्भूत इति विद्वद्भिरवधेयम्[३] ।

**अतः स परमो धर्मो यो वेदादधिगम्यते ।**

**अवरः स तु विज्ञेयो यः पुराणादिषु स्थितः[४] ।।**

अनेन प्रकारेण पुराणस्येतिहासस्य च मध्ये महान् भेदो वर्तते, तथापि सरलातिसरलभावेन सर्वसाधारणानां सम्मुखे प्रतिपादितत्वात् पुराणानाम् अवतरत्वमुपस्थापितम् । पुराणानामवरत्वपरिकल्पनाद् अत्र पुराणानां न्यूनत्वं न जातम् , प्रत्युत धर्मस्य विज्ञापने वेदानां सान्निध्याद् अवश्यमस्ति पुराणानां इतिहासस्य च मध्ये पार्थक्यम् । अनेन प्रकारेण ‘इतिहासपुराणयोर्मध्ये भेदः’ इति विषयमिमत्रैव विस्तारभयात् समाप्यते ।

## २.४ पुराणानां लक्षणानि ।

---

1 पु. पर्या.. गवेषणात्मकभागः पृ. ६६

2 काव्यमीमांसा. पृ. २

3 याज्ञवल्क्यस्मृतिः १।३

4 History of Dharmashastra vol . p. 410

संस्कृतसाहित्यमतीव विशालतममस्ति, तस्मिन् पुराणानां प्रथमसृष्टित्वेन तस्य कीदृशं माहात्म्यं तत्तु विशेषतो मत्स्यादिषु पुराणेषु समुपलभ्यते तद्यथा -

**उत्पन्नमात्रस्य पुरा ब्रह्मणोव्यक्तजन्मनः ।**
**पुराणमेतद्वेदाश्च मुखेभ्योनुविनिसृताः ।।**
**वेदान् सप्तर्षयस्तस्माज्जगृहुस्तस्य मानसा ।**
**पुराणं जगृहुश्चाद्या मुनयस्तस्य मानसाः[१] ।।**

पुराणं ततः किञ्चिद् विलक्षणसम्पन्नम् । मुनिधाराया प्रवर्तमानानां शास्त्राणां मध्ये तस्य सृष्टेः प्राथम्याद् यद् वैशिष्ट्यं प्रतिपादितं तत्कलौ युगे अल्पज्ञानां जीवानां हितार्थाय सरलया वाचा संवलितं पुराणशास्त्रमिदं सृष्टमिति देवीभागवतस्य वचनमनेन प्रकारेण वर्तते यद् -

**अल्पायुषोल्पबुद्धिश्च विप्रान् ज्ञात्वा कलावथ ।**
**पुराणसंहिता पुण्या कुरुतेसौ युगे युगे[२] ।।**

इति ज्ञात्वा लक्ष्यतेवलोक्यतेनेन तदिति लक्षणम् , अत एतेषां पुराणानां किं लक्षणं भवितुमर्हति ? इति प्रश्नः समुद्भवति, अतः संस्कृतवाङ्मयानां जनानां मनसि संदेहमिममपनेतुं यथाशक्ति प्रयत्नं करोमि । कस्यचन वस्तुनः सिद्धौ लक्षणप्रमाणयोरवश्यमेव आवश्यकता वर्तते । अतः किं लक्षणकं पुराणमिति जिज्ञासायामस्माभिः समग्रेस्मिन् संस्कृतवाङ्मये केवलं पुराणभाग एव

---

[1] मार्कण्डेयपुराणम्. ४५।२०-२१

[2] देवीभागवतम्. १।३०।२०

तद्विषयविचारः प्राप्यते । तत्र च पुराणेषु तल्लक्षणवर्ण्णनप्रसङ्गे मया द्विविधं लक्षणं प्राप्यते यथा –

पञ्चलक्षणम् ।

दशलक्षणम् ।

द्विविधे लक्षणे सति साधारणतः समेषां पुराणानां पञ्चलक्षणमेव प्रसिद्धमस्ति यस्य प्रामाण्यं विविधेषु नैकेष ग्रन्थेषु कोशेषु चानेन प्रकारेण समुपलभ्यते तद्यथा –

२.४.१ पुराणानां पञ्चलक्षणत्वम् ।

मत्स्यपुराणकारो मत्स्यपुराणे पुराणानां पञ्च लक्षणानि प्रतिपादयति, तद्यथा –

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।**

**वंशानुचरितं चैव पुराणं पञ्चलक्षणम्**[1] **।।**

इति मत्स्यपुराणस्यास्य श्लोकस्याानुसारमेतानि पञ्च लक्षणानि सन्ति तद्यथा –

(१) सर्गः ।

(२) प्रतिसर्गः ।

(३) वंशः ।

(४) मन्वन्तराणि ।

(५) वंशानुचरितम् ।

एतान्येव पुराणस्य पञ्चलक्षणानि बहुषु पुराणेषु प्रतिपादितानि सन्ति तद्यथा – मत्स्यपुराणम् , गरुडपुराणम्[2] ,

---

[1] मत्स्यपुराणम्. ५३।६३

[2] गरुडपुराणम् २१५।१४

विष्णुपुराणम्[१] , मार्कण्डेयपुराणम्[२], अग्निपुराणम्[३], भविष्यपुराणम्[४], ब्रह्मवैवर्तपुराणम्[५], वराहपुराणम्[६], स्कन्दपुराणस्य प्रभासखण्डे[७], कूर्मपुराणस्य पूर्वार्द्धे[८], ब्रह्माण्डपुराणस्य प्रक्रियाखण्डे[९], शिवपुराणस्य वायवीयसंहितायाम्[१०] , इत्थं द्वादशसु पुराणेषु पुराणस्य पञ्चलक्षणानि प्रतिपादितानि सन्ति, तत्र पञ्चानां लक्षणानां भावोनेन प्रकारेण भवितुमर्हति, तद्यथा -

(१) सर्गः ।

सर्गो नाम जगत उत्पत्तिः, सर्गपदादवबोध्यते । तत्र ब्रह्मव्यतिरिक्तं यद्यद्वस्तु जगति दृश्यमानं भवति, तत्तद्वस्तुन उत्पत्तिः सर्गपदेन व्यपदिश्यते । एतन्मूलकत्वेन इन्द्रियार्थादीनां सर्वेषां सम्भवः, श्रीमद्भागवतकारो द्वावशस्कन्धे सर्गलक्षणं कथयति यद् -

**अव्याकृतगुणक्षोभाद् महतस्त्रिवृतोहम्।**
**भूतमात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते[११] ।।**

(२) प्रतिसर्गः ।

---

1 विष्णुपुराणम् ३।६।२४

2 मार्कण्डेयपुराणम् १३४।२४

3 अग्निपुराणम् १।१४

4 भविष्यपुराणम् २।५

5 ब्रह्मवैवर्तपुराणम् १३३।६

6 वराहपुराणम् २।४

7 स्कन्दपुराणे प्रभासखण्डे २।८४

8 कूर्मपुराणस्य पूर्वार्द्धे १।१२

9 ब्रह्माण्डपुराणस्य प्रक्रियाखण्डे १।३८

10 शिवपुराणस्य वायवीयसंहितायाम् १।४१

11 श्री. भा. पुराणम् १२।७।११

सर्गाद्विपरीतं यद्यो वा प्रलयः, स एव प्रतिसर्गः कथ्यते । अस्य ब्रह्माण्डस्य समयानुसारं प्रलयो भवति । अयं नैमित्तिकप्राकृतिकनित्यात्यन्तिकेति भेदेन चतुर्विधः, तद्यथा –

**नैमित्तिकः प्राकृतिको नित्यमात्यन्तिको लयः ।**
**संस्थेति कविभिः प्रोक्ता चतुर्द्धास्य स्वभावतः[१] ।।**

सकलमेतत् संस्थापदेन श्रीमद्भावतमहापुराणे सन्निवेशितमस्ति । विष्णुपुराणे तथा चान्येषु पुराणेषु चायमेव प्रतिसर्गपदस्यार्थः प्रतिसञ्चारपदेन व्यवहृतो भवति ।

(३) वंशः ।

वंशपदेन कदाचित् केवलं राजवंशस्यार्थबोधः स्वीकृतो भवेत् , किन्तु तन्न समीचीनं यतो राजवंशपदेन वंशपदस्य व्यवहारात् तस्य सीमितत्वदोषो भवति, अतः संसारेस्मिन् ब्रह्मणा येषां येषां राज्ञां सृष्टिः कृता, तेषां भूतभविष्यवर्तमानकालीना स्थितिर्नाम वंशः, इति श्रीमद्भागवतादिषु ग्रन्थेषु यत्प्रतिपादितं ततो व्यापकरूपेण अपरेषां मुनिऋष्यादीनां सकलानां वंशमपि स्वीक्रियते । पुराणानामनन्तरं एतत्सम्बन्धे वर्णना विहिता, यथा श्रीमद्भागवतपुराणे लिखितमस्ति यद् –

राज्ञा ब्रह्मप्रसूतानां वंशस्त्रैकालिकोन्वयः[२] ।

इति कृत्वा समेषां विदुषां स्वीकारमूलिका युक्तिरवश्यमेव अनुसर्तव्या वर्तते ।

(४) मन्वन्तरम् ।

---

1 श्री. भा. पुराणम् १२।७।१७

2 श्री. भा. पुराणम् १२।७।१६

अस्य संसारस्य स्थितेर्विषये विविधसृष्ट्यर्थं ये ये परिच्छेदाः समालोचनमाध्यमेन समुपलभ्यन्ते, ते परिच्छेदा एव पुराणवाङ्मये मन्वन्तराणि इति नाम्ना प्रसिद्धानि सन्ति । संपूर्णरूपेण महाप्रलयस्य संघटनार्थं चतुर्दशमन्वन्तराणि पुराणवाङ्मय आपद्यन्ते । तथा च प्रतिमन्मन्वन्तरमेकस्यैव मनोराधिपत्यं स्वीकृतं भवति, इति हेतोः मन्वन्तरं तत्कथ्यते । प्रतिमन्वन्तरं मनुदेवतादिपदार्थघटकम् आयाति तद्यथा श्रीमद्भागवतस्य द्वादशस्कन्धस्य श्लोकोयं कथयति यद् -

**मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वराः ।**
**ऋषयोंशावतारश्च हरेः षड्विधमुच्यते[१] ।।**

(५) वंशानुचरितम् ।

पूर्वोक्तेषु समुत्पन्नानां वंशधराणां तथा च प्रथमतः प्रसिद्धानां राज्ञां विशिष्टविवरणं यस्मादेव समुपलभ्यते तद् वंशानुचरितं कथ्यते । श्रीमद्भागवतं वंशानुचरितस्य व्याख्यामनेन प्रकारेण करोति यथा -

**वंशानुचरितं तेषां वृत्तं वंशधराश्च ये[२] ।**

विशेषतो महर्षीणां राज्ञां च चरित्राणि यत्र समाविष्टानि सन्ति, एवं महर्षीणां यत्र च राज्ञां चरित्राणि अधिकान्युपलब्धानि भवन्ति, तत् पुराणेषु वंशानुचरितं कथ्यते । अनेन प्रकारेण 'पुराणानां लक्षणानि' इति विषयमिममत्रैव विस्तारभयात् समाप्यते ।

---

[1] श्री. भा. पुराणम् १२।७।१५

[2] श्री. भा. पुराणम् १२।७।१६

२.५ पुराणस्य दशलक्षणकत्वम् ।

पुराणं पञ्चलक्षणम् इत्यतः किमपि वैभिन्यं पुराणेषु समुपलभ्यते । तत्रैवं लक्षणप्रतिपादकेषु श्रीमद्भागवतपुराणस्य स्थलद्वये नाम द्वितीये स्कन्धे, द्वादशस्कन्धे च प्रदत्तौ श्लोकौ समुपलब्धेषु लक्षणेषु मूलतः प्रायः साम्यत्वं प्रतिपादयति यथा –

**अत्र सर्गो विसर्गश्च स्थानं पोषणमूत्तयः ।**
**मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः[1] ।।**
**सर्गोस्याथ विसर्गश्च वृत्तिरक्षान्तराणि च ।**
**वंशो वंशानुचरितं संस्था हेतुरपाश्रयः[2] ।।**

नामतो वैषम्यं दृष्टिगोचरीभवति । अत्र केवलं शब्दभेदं विना अभिप्रायभेदः परिलक्ष्यते यथा –

| क्रमः | द्वितीयस्कन्धलक्षणम् | द्वादशस्कन्धलक्षणम् |
|---|---|---|
| (१) | सर्गः | सर्गः |
| (२) | विसर्गः | विसर्गः |
| (३) | स्थानम् | वृत्तिः |
| (४) | पोषणम् | रक्षा |
| (५) | ऊतिः | हेतुः |
| (६) | मन्वन्तरम् | अन्तरम् |
| (७) | ईशानुकथा | वंशवंशानुचरिते |
| (८) | निरोध | |

संस्था–नित्यप्रलयः–नैमित्तिकप्रलयः–प्राकृतिकप्रलयः

[1] श्री. भा. पुराणम् २।१०।१

[2] श्री. भा. पुराणम् १२।७।९

(९) मुक्तिः संस्था - आत्यन्तिकप्रलयः

(१०) आश्रयः आश्रयः

ब्रह्मवैवर्तपुराणेपि पुराणस्य दशलक्षणकत्वमनेन प्रकारेण प्रतिपादितं वर्तते यथा -

**सृष्टिश्चापि विसृष्टिश्च स्थितिः तेषां च पालनम् ।**
**कर्मणां वासना वार्ता मनूनां च क्रमेण च ।।**
**वर्णनं प्रलयानां च मोक्षस्य च निरूपणम् ।**
**उत्कीर्तनं हरेरेव देवानां च पृथक् पृथक् ।।**
**दशाधिकं लक्षणं च महतां परिकीर्तनम्[1] ।।**

ब्रह्मवैवर्तपुराणस्य मतानुसारं पुराणस्य दशलक्षणान्यनेन प्रकारेण भवितमर्हन्ति यथा -

(१) सृष्टिः ।
(२) विसृष्टिः ।
(३) स्थितिः ।
(४) पालनम् ।
(५) वासना ।
(६) मनुक्रमः ।
(७) प्रलयवर्णनम् ।
(८) मोक्षनिरूपणम् ।
(९) हरेरुत्कीर्तनम् ।
(१०) देवानामुत्कीर्तनम् ।

[1] ब्रह्मवैवर्तपुराणम् , श्रीकृष्णखण्डः १३१।८८-९०

यद्वा भवतु पूर्वोक्ते दशलक्षणस्यान्तर्भावः पञ्चसु लक्षणेषु परिकल्पनीयः, अन्यथोभयोः मतविरोधादुभयोरप्रामाण्यमापपद्येत । तत्र केचन पुराणसमीक्षका महापुराणानां दशलक्षणकत्वमुपपुराणानां च पञ्चलक्षणकम् इति स्वीकुर्वन्ति, तदनुरोधेन ते पञ्चलक्षणप्रसङ्गे ब्रह्मवैवर्तपुराणस्य 'श्रीकृष्णखण्डः' इति खण्डस्य वचनं तथा च दशलक्षणप्रसङ्गे श्रीमद्भागवतमहापुराणस्य वचनमनुसरन्तः पुराणविदः कथयन्ति यद् -

**एतदुपपुराणानां लक्षणं च विदुर्बुधाः ।**
**महतां पुराणानां लक्षणं कथयामि ते[१] ।।**
**दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः।**
**केचित् पञ्चविधं प्राहुर्महदल्पव्यवस्थया[२] ।।**

किन्तु तत्रोभयोर्लक्षणयोः सामञ्जस्याभावात् प्रामाणिकताया विचारे तत्रैकवाक्यता करणीया । तत्र पञ्चलक्षणेन सह दशलक्षणस्य सामञ्जस्यमनेन प्रकारेण भवितुमर्हति यथा -

सर्गे - विसर्गहेत्वाश्रयापाश्रयाणामन्तर्भावः ।
प्रतिसर्गे - संस्थानिरोधयोरन्तर्भावः ।
मन्वन्तरे - अन्तरस्यान्तर्भावः ।
वंशवंशानुचरितयोः
-वृत्तिस्थानरक्षापोषणेशानुकथानामन्तर्भावः ।

1 ब्रह्मवैवर्तपुराणम् , श्रीकृष्णखण्डः १३१।७

2 श्री. भा. पुराणम् १२।७।१०

अतो दशलक्षणानि पञ्चलक्षणेष्वश्यमन्तर्भुक्तानि भवितव्यानि, इति समेषां पुराणपारावारीणां मतं स्वीकर्तव्यमिति यथामति 'पुराणस्य दशलक्षणकत्वम्' इति प्रकरणमत्रैव समाप्यते ।

२.६ पुराणानां प्रकारप्रकल्पनम् ।

पुरा विषयमानयति इति पुराणम् , अथवा पुरा अपि प्रतिदिनं नवं नवं प्रतिभाति इति पुराणम् । पुराणानां प्रकारविषयकं प्रकल्पनं कया रीत्या वर्तते ? इति जिज्ञासायां निरूपणं करोमि यद् – यद्यपि पुराणानां महापुराणानाम् उपपुराणानां च भेदेन प्रकारद्वयं परिकल्पितं तथापि तयोर्मध्ये नास्ति भेदः । साधारणतः पुराणानां प्रकाराः त्रयः सन्ति तद्यथा –

(१) महापुराणम् ।

(२) उपपुराणम् ।

(३) औपपुराणम् ।

संख्यागणनाप्रसङ्गे प्रत्येकस्य अष्टादशसंख्यागणना वर्तते, किन्तु केषाञ्चिद्विदुषां मतानुसारं समेषां पुराणानां पञ्चप्रकाराणि पुराणानि सन्ति तद्यथा –

(१) महापुराणानि ।

(२) उपपुराणानि ।

(३) औपपुराणानि ।

(४) उपोपपुराणानि ।

(५) उपौपपुराणानि ।

किन्तु संख्यागणनावसरे मत्स्यपुराणस्य मतानुसारमेकमेव पुराणं वर्तते यथा –

**पुराणमेकमेवासीत्तदा कल्पान्तरेनघः ।**

**त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम्[1] ।।**

अनेन प्रकारेण 'पुराणानां प्रकारप्रकल्पनम्' इति प्रतिपाद्योपप्रकरणमिदं विस्तारभयात् समाप्यते ।

२.७ महापुराणानां क्रमः ।

**यस्मात् पुराह्यनक्तीदं पुराणं तेन कथ्यते ।**

**निरुक्तिमस्य यो वेदः सर्वपापैः प्रमुच्यते[2] ।।**

देवीभागवते पुराणगणनायाः प्रसङ्गे समेषां महापुराणानां त्वेवं क्रमो प्रदत्तः, यथा -

**म-द्वयं भ-द्वयं चैव ब्र-त्रयं व-चतुष्टयम् ।**

**अ-ना-प-लिं-ग-कू-स्कानि पुराणानि प्रचक्षते[3] ।।**

अनेन पद्येन महापुराणानां गणनां करिष्यामः, तर्हि क्रमोयं भविष्यति यथा -

म-अक्षरे पुराणद्वयम् - (१) मत्स्यपुराणम् ।
(२) मार्कण्डेयपुराणम् ।

भ-अक्षरे पुराणद्वयम् - (१) भागवतपुराणम् ।
(२) भविष्यपुराणम् ।

ब-अक्षरे पुराणत्रयम् - (१) ब्रह्मपुराणम् ।
(२) ब्रह्मवैवर्तपुराणम् ।
(३) ब्रह्माण्डपुराणम् ।

व-अक्षरे पुराणचतुष्टयम्- (१) वायुपुराणम् ।

---

1 मत्स्यपुराणम् ५।३४

2 विष्णुपुराणम्

3 सं. निबन्धावली

(२) वामनपुराणम् ।

(३) वराहपुराणम् ।

(४) विष्णुपुराणम् ।

अ-अक्षरे पुराणैकम् - (१) अग्निपुराणम् ।

ना-अक्षरे पुराणैकम् - (१) नारदपुराणम् ।

प-अक्षरे पुराणैकम् - (१) पद्मपुराणम् ।

लिं-अक्षरे पुराणैकम् - (१) लिङ्गपुराणम् ।

ग-अक्षरे पुराणैकम् - (१) गरुडपुराणम् ।

कू-अक्षरे पुराणैकम् - (१) कूर्मपुराणम् ।

स्क-अक्षरे पुराणैकम् - (१) स्कन्दपुराणम् ।

ब्रह्माण्डनामके पुराणे सर्वेषां महापुराणानां गणना अनया रीत्या कृता वर्तते यथा -

(१) ब्रह्मपुराणम् । (२) पद्मपुराणम् ।

(३) विष्णुपुराणम् । (४) शिवपुराणम् ।

(५) भागवतपुराणम् । (६) नारदपुराणम् ।

(७) मार्कण्डेयपुराणम् । (८) अग्निपुराणम् ।

(९) भविष्यपुराणम् । (१०) ब्रह्मवैवर्तपुराणम् ।

(११) लिङ्गपुराणम् । (१२) वराहपुराणम् ।

(१३) स्कन्दपुराणम् । (१४) वामनपुराणम् ।

(१५) कूर्मपुराणम् । (१६) मत्स्यपुराणम् ।

(१७) गरुडपुराणम् । (१८) ब्रह्माण्डपुराणम् ।

नारदीयनामके पुराणे समेषां महापुराणानां गणना अनया रीत्या कृता वर्तते यथा -

(१) ब्रह्मपुराणम् । (२) पद्मपुराणम् ।

(३) विष्णुपुराणम् । (४) वायवीयपुराणम् ।

(५) भागवतपुराणम् । (६) नारदीयपुराणम् ।

(७) मार्कण्डेयपुराणम् । (८) अग्निपुराणम् ।

(९) भविष्यपुराणम् । (१०) ब्रह्मवैवर्तपुराणम् ।

(११) लिङ्गपुराणम् । (१२) वराहपुराणम् ।

(१३) स्कन्दपुराणम् । (१४) वामनपुराणम्।

(१५) कूर्मपुराणम् । (१६) मत्स्यपुराणम् ।

(१७) गरुडपुराणम् । (१८) ब्रह्माण्डपुराणम् ।

अनेन प्रकारेण 'महापुराणानां क्रमः' इति प्रतिपाद्योपप्रकरणमिदं विस्तारभयात् समाप्यते ।

## २.८ उपपुराणानां विवेचनम् ।

महर्षिवेदव्यासेन अष्टादशमहापुराणवद् अष्टदशोपपुराणान्यपि विरचितानि सन्ति, तेषामुपपुराणानां नामगणना अनया रीत्या महर्षिवेदव्यासेन कृता वर्तते यथा –

(१) आदिपुराणम् ।(२) नृसिंहपुराणम् ।

(३) स्कन्दपुराणम् ।(४) शिवधर्मपुराणम् ।

(५) दुर्वासःपुराणम् । (६) नारदीयपुराणम् ।

(७) कपिलपुराणम् ।(८) वामनपुराणम् ।

(९) औशनसपुराणम् । (१०) ब्रह्माण्डपुराणम् ।

(११) वरुणपुराणम् ।(१२)कालिकापुराणम् ।

(१३) माहेश्वरपुराणम् । (१४) शाम्बपुराणम् ।

(१५) सौरपुराणम् । (१६) पराशरपुराणम् ।

(१७) मारीचपुराणम् । (१८) भास्करपुराणम्।

अनेन प्रकारेण 'उपपुराणानां विवेचनम्' इति प्रतिपाद्योपप्रकरणमिदं विस्तारभयात् समाप्यते ।

२.९ औपपुराणानां विवेचनम् ।

यथा महर्षिवेदव्यासेन अष्टादशमहापुराणानि, अष्टादशोपपुराणानि विवेचितानि सन्ति, तथैव अष्टदशौपपुराणान्यपि निर्मापितानि सन्ति, तेषामौपपुराणानां नामगणना अनया रीत्या महर्षिणा कृता वर्तते यथा –

(१) सनत्कुमारपुराणम् । (२) बृहन्नारदीयपुराणम्।

(३) आदित्यपुराणम् । (४) सूर्यपुराणम् ।

(५) नन्दिकेश्वरपुराणम्। (६) कौर्मपुराणम् ।

(७) भागवतपुराणम् । (८) वसिष्ठपुराणम् ।

(९) भार्गवपुराणम् । (१०) मुद्गलपुराणम्।

(११) कल्किपुराणम् । (१२) देवीपुराणम् ।

(१३) महाभागवतपुराणम् । (१४) बृहद्धर्मपुराणम्।

(१५) परानन्दपुराणम् । (१६) वह्निपुराणम् ।

(१७) हरिवंशपुराणम् । (१८) पशुपतिपुराणम् ।

एवं श्रीस्वामिना ज्ञानानन्दसरस्वतीमहोदयेन स्वकीये धर्मकल्पद्रुमे अष्टादशानामौपपुराणानामपि संकेतः कृतोस्ति, तेषां मते पञ्चप्रकारकाणि पुराणानि सन्ति, तद्यथा –

(१) पुराणानि (महापुराणानि)।

(२) उपपुराणानि।

(३) औपपुराणानि ।

(४) उपोपपुराणानि ।

(५) उपौपपुराणानि ।

एवं ऋषिभिर्महर्षिभिश्च पुराणानां मुख्यतया पञ्चभेदाः प्रकल्पिताः सन्ति, तद्यथा -

(१) महापुराणानि ।

(२) पुराणानि ।

(३) उपपुराणानि ।

(४) पुराणसंहिता ।

(५) इतिहासः ।

तत्र महाभारत इतिहासलक्षणोपेतमपि कर्मोपासना ज्ञानात्मककाण्ड- त्रयरहस्यपूर्णत्वात् सर्वाङ्गपूर्णं महाभारतं पुराणमङ्गीक्रियते[1] ।

पुराणानि च लौकिकेतिहासरूपाणि नापि कल्पितगाथानि, वस्तुतः पुराणानि ज्ञानत्रिकालदर्शीणि वेदभाष्यरूपाणि सन्ति । अत एव वेदानां सर्वे मन्त्राः पुराणानां च सर्वे विषया अपि प्रायो भावत्रितयात्मकाः सन्ति ।

अनेन प्रकारेण 'औपपुराणानां विवेचनम्' इति प्रतिपाद्योपप्रकरणमिदं विस्तारभयात् समाप्यते ।

---

[1] विष्णुपुराणम् ३।६।१५

२.१० पुराणानां विषयाः ।

पुराणानां कानि स्रोतांसि येषामाधारेण भगवता श्रीवेदव्यासेन तेषां प्रणयनं कृतमिति विशिष्टायां जिज्ञासायामिदमुच्यते यत् – पुराणतत्त्ववेत्ता महर्षिः वेदव्यासः चतुर्णामाख्यानानाम् , उपाख्यानानाम् , गाथानाम् , कल्पशुद्धीनां चोपकरणानामाशयमादाय अष्टादशपुराणानां रचनां चक्रे तद्यथा –

**आख्यानैश्चाप्युपाख्यानैः गाथाभिः कल्पशुद्धिभिः ।**
**पुराणसंहितां चक्रे पुराणार्थं विशारदः[१] ।।**

अनेन प्रकारेण 'पुराणानां विषयाः' इति प्रतिपाद्योपप्रकरणमिदं विस्तारभयात् समाप्यते ।

२.१०.१ आख्यानोपाख्यानानि ।

किन्नाम आख्यानम् ? किन्नाम उपाख्यानम् ? इति जिज्ञासायामुच्यते यत् – तत्र स्वयं दृष्टार्थकथानकमाख्यानमुच्यते, परम्परया श्रुतं कथानकम् उपाख्यानमाख्यायते तद्यथा –

**स्वयं दृष्टार्थकथनं प्राहुराख्यानकं बुधाः ।**
**श्रुतस्यार्थस्य कथनमुपाख्यानं प्रचक्षते[२] ।।**

अर्थाद् यस्यार्थस्य साक्षात्कारः स्वयं वक्त्राकृतो वर्तते, तदाख्यानं निगद्यते । यस्य चार्थस्य कथनं वक्त्रा अन्यजनद्वारा श्रुतं विद्यते तदुपाख्यानं कथ्यते । एतदनुसारं मर्यादापुरुषोत्तमस्य भगवतः श्रीरामचन्द्रस्य, सत्यव्रतस्य राज्ञो हरिश्चन्द्रस्य, धर्मिष्ठस्य राज्ञो

---

[1] अ. पुराणदर्पणम् २५
[2] म. भा. आदिपर्व ८५।१२

ययातेश्च कथानकं न केवलं परम्पराश्रुतमस्ति, तद् रामोपाख्यानं हरिश्चन्द्रोपाख्यानं ययात्युपाख्यानं च संस्कृतरागिभिर्विद्वद्भिः कथ्यते ।

केषाञ्चिद्विदुषां मते भेदो वर्तते, य न दृष्टश्रुतकारकः कारणं विद्यते, अपि तु महदल्पकारको वर्तते । आकारे यत्कथानकं महदस्ति तदाख्यानं निगद्यते, अपेक्षाकृतं स्वल्पाकारं कथानकमुपाख्यानमिनि नाम्ना प्रसिद्धमस्ति । यथा रामायणे श्रीरामस्य कथानकं व्यापित्वादाख्यानमुच्यते, तदेकदेशवर्तित्वात् सुग्रीवस्य कथानकमुपाख्यानं कथ्यते । अनेन प्रकारेण 'आख्यानोपाख्यानानि' इति प्रतिपाद्योपप्रकरणमिदं विस्तारभयात् समाप्यते ।

२.१०.२ गाथाः ।

अज्ञातकर्तॄणां लोकेषु प्रख्यातानां केषाञ्चिन्महापुरुषाणां वैशिष्ट्यबोधकानां श्लोकानां संज्ञा गाथा इति कथ्यते । प्राचीनसाहित्येषु अनेकान्येवंविधानि प्राचीनानि पद्यानि समुपलभ्यन्ते, येषां कर्तॄणां नामानि नोपलभ्यन्ते, यानि केषाञ्चिन्महामान्यमहीपतीनां प्रशंसायामसामान्ये शौर्ये दानमहिम्नि च प्रतिपादितानि सन्ति । ईदृशाज्ञातकर्तृकाः परम्परया प्रचलितलोके प्रख्याताः श्लोका गाथेति पदेनोच्यन्ते । पुराणगाथासु केषाञ्चिन्महापुरुषाणां सार्वभौमं जीवनदर्शनं संक्षेपत एकस्मिन् द्वयोर्वा श्लोकयोरभिव्यक्तीकृतमस्ति । अधिकांशत इमा गाथा भारतीयसाहित्येष्वतीतकालतः सम्बद्धाः सन्ति, तथैव ऐतिहासिकव्यक्तीनां दानमहत्त्वाभिषेकादीनां वर्णनं कुवन्ति, तथा च महाभारते ययातिगाथा यथा -

**न जातु कामः कामानामुपभोगेन शाम्यति ।**
**हविषाकृष्णवर्त्मेव भूय एवाभिवर्द्धते ।।**

**यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः।**

**एकस्यापि न पर्याप्तं तस्मात्तृष्णां परित्यजेत्[१] ।।**

इममेव गाथाविषयकं विषयं महर्षिवेदव्यासो वायुपुराणे पितृगाथाया निरूपणं करोति यथा –

**एष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेत् ।**

**यजेत नाश्वमेधेन नीलं वा वृषमुत्सृजेत् ।।**

**गयां यास्यति यः पुत्रः स नस्त्राता भविष्यति ।**

**गयाप्राप्तं सुतं दृष्ट्वा पितृणामुत्सवो भवेत्[२] ।।**

मत्स्यपुराणे मनुमत्स्ययोः संवादस्य प्रसङ्गे पितृगाथा कथिता वर्तते, तद्यथा –

**अपि स्यात्स कुलेस्माकं यो नो दद्याज्जलाञ्जलिम् ।**

**नदीषु बहुतोयासु शीतलासु विशेषतः[३] ।।**

विष्णुपुराणे सप्तानामृषीणां गाथा, कार्तवीर्यस्य च विशेषरूपेण गाथा वर्तते, तद्यथा –

**तत्रापि श्रूयते श्लोको गीतः सप्तर्षिभिः पुरा।**

**खट्वाङ्गेन समो मान्यः कश्चिदुर्व्यां भविष्यति ।।**

**नूनं न कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः ।**

**यशोदानैस्तपोभिर्वा प्रश्रयेण दमेन च[४] ।।**

अनेन प्रकारेण 'गाथाः' इत्यस्य तात्पर्य्यमत्र प्रतिपाद्योपप्रकरणमिदं विस्तारभयात् समाप्यते ।

---

1 वायुपुराणम् १०५।९-१०

2 वायुपुराणम्

3 मत्स्यपुराणम् २०३।३

4 विष्णुपुराणम् ४।४।३८-३९

२.१०.३ कल्पशुद्धिः ।

कल्पशुद्धिशब्दस्य तात्पर्यनिर्णये विदुषां मतमस्ति यत्पारस्परिको भेदपरकः । केचन विद्वांसः कल्पशुद्धिशब्दस्य स्थाने कल्पजोक्तिरिति पाठं मत्वा विभिन्नेषु कल्पेषूत्पद्यमानानां पदार्थानां विवरणमित्यर्थं कुर्वन्ति । श्रीधरस्वामिना तु कल्पशुद्धिरित्यस्यार्थः श्राद्धकल्पः इति कृतो वर्तते । पण्डितवर्याणां मधुसूदनोझामहोदयानां मते कल्पशुद्धिशब्देन धर्मशास्त्रस्य सर्वे विषया अभीष्टाः सन्ति । कल्पस्य तात्पर्यं 'वेदाङ्गमः' इति मन्यते । अथ श्रौत-गृह्य-धर्मसूत्र-सदाचारसंस्कारा अन्तर्भवन्ति । शुद्धिपदेन षड्विधा शुद्धिर्भवति यथा –

(१) मलशुद्धिः ।
(२) स्पर्शशुद्धिः ।
(३) अघशुद्धिः ।
(४) एनःशुद्धिः ।
(५) आत्मशुद्धिः ।
(६) मनःशुद्धिः ।

तथा च भगवता व्यासदेवेन पुराणानां निर्माणस्यावसरे प्रतिसर्ग एषां चतुर्णामाख्यानोपाख्यानगाथाकल्पशुद्धीनां सम्यगुपयोगः कृतो वर्तते, अत इमानि पुराणानां स्रोतांसि सन्ति । स्कन्दपुराणानुसारं पुराणेषु पञ्चलक्षणातिरिक्तो यावान् विवेच्यविषयो विद्यते, तावानाख्यानपदेन प्रसिद्धो वर्तते तद्यथा –

पञ्चाङ्गानि पुराणस्य चाख्यानमितरत् स्मृतम्[१] ।

[1] मत्स्यपुराणम् ५३।६४

अनेन प्रकारेण मत्स्यपुराणस्य कथनानुसारं पञ्चलक्षणमेवाख्यानकम् उच्यते यथा –

पञ्चाङ्गानि पुराणेषु आख्यानकमिति स्मृतम्[1] ।

अनेन प्रकारेण कल्पस्य तात्पर्य्यमत्र प्रतिपाद्योपप्रकरणमिदं विस्तारभयात् समाप्यते ।

२.११ पुराणसंहिता – पुराणमितिहासश्च ।

पुराणसाहित्यस्येतिहासेन सहातीव घनिष्ठः सम्बन्धः प्राचीनग्रन्थेषु सम्मिलितरूपेणोपलभ्यते । छान्दोग्योपनिषदि कथनमिदमस्ति यद् – एकदा यदा देवर्षिनारदो ब्रह्मविद्यामध्येतुं सनत्कुमारणां पार्श्वं उपस्थितः, तदा तैः पृष्टो यद्भवता इतः पूर्वं किं किमधीतमस्ति ? तस्य प्रश्नस्योत्तरे स स्वाधीतासु विद्यासु इतिहासस्य पुराणानां च नामानि गृहीत्वा तान्येव पुराणानि पञ्चमं वेदमित्युक्तवान् , यथोक्तमस्ति यद् –

**ऋग्वेदं भगवो ध्येमि यजुर्वेदं सामवेदमप्यथर्वाण-**
**मितिहासपुराणं पञ्चमं वेदानां वेदम्[2] ।।**

न्यायभाष्ये वात्स्यायनेनापि विषयभेदात् साहित्यस्य त्रयो भेदाः स्वीकृताः सन्ति यथा –

(१) यज्ञः ।

(२) लोकचरितम् ।

---

[1] छा. उ. ७।१।१४
[2] श्री. भा. ११।१५।२३

(३) व्यवहारस्थापनम् ।

एषु मन्त्रब्राह्मणात्मकस्य वेदस्य विषयः । लोकचरितम् इतिहासपुराणानां विषयः । तथा व्यवहारव्यवस्थापनम् - मानवानां पुण्यपापादीनां निर्धारणं च धर्मशास्त्रस्यास्ति विषयः ।

वस्तुतो द्रष्टुः प्रवक्तुश्च दृष्ट्या एषु भेदा नास्ति । यतो हि त एव मन्त्राणां द्रष्टारः । इतिहासपुराणस्य धर्मशास्त्रस्य च द्रष्टारो वक्तारश्च सन्ति, किन्तु विषयविवेचनदृष्ट्या पार्थक्यं स्वीक्रियते । तैत्तिरीयारण्यके भाष्यकृता कथितं यद् -

यद् ब्राह्मणानीतिहासान् पुराणानि कल्पागाथानाराशंसी[१] ।

इति तैत्तिरीयारण्यकं विवृण्वता भाष्यकृता भगवतोक्तम् , पुराणानि ब्रह्मादीनि यद्वा देवासुराः संयता आसन्नित्यादयः, इतिहासः,

आत्मा वा इदमेवाग्र आसीत् नान्त्यत् किञ्चमिषदिति सृष्ट्यादि- प्रातिपादिकानि पुराणानि[२] ।

इत्युक्तमस्ति । अनेन प्रकारेण समस्तेषु पुराणेषु मानवानां पुण्यपापादीनां निर्धारणं कृतमस्ति, अतो पुराणेषु भारतवर्षस्य चिन्तनं मया क्रियते । अष्टादशसु पुराणेषु प्रायो भारतवर्षस्यैव चिन्तनं कृतमवलोक्यते, ततः पूर्वं समेषां पुराणानां विस्तारभयात् संक्षेपेण सारांशं प्रतिपादयितुं यथाशक्ति प्रयासमनेन प्रकारेण करोमि यथा -

२.१२ पुराणानां श्लोकसंख्या ।

सर्वेषु पुराणेषु श्लोकानां संख्या पृथक्पृगग्वर्तते, अतो यथापुराणं श्लोकानां संख्या प्रतिपाद्यते ।

---

[1] तैत्तिरीयारण्यकम्

[2] तैत्तिरीयारण्यके

२.१२.१ ब्रह्मपुराणम् ।

निम्नलिखितस्य श्लोकस्य कथनानुसारमस्मिन् ब्रह्मपुराणे श्लोकाः सन्ति तद्यथा –

तच्च द्वादशसाहस्रं ब्रह्माण्डं द्विशताधिकम् ।

ब्रह्माण्डपुराणे द्विशताधिकद्वादशसहस्र (१२२००) परिमिताः श्लोकाः सन्ति ।

२.१२.२ पद्मपुराणम् ।

अस्मिन् पद्मपुराणे श्लोकानां संख्या निर्धारिता वर्तते, सा निर्धारिता संख्या अनेन प्रकारेणास्ति यथा –

पाद्मन्तु पञ्चपञ्चाशत्सहस्राणीह कथ्यते ।

अनेन प्रकारेण पद्मपुराणे पञ्चपञ्चाशत्सहस्र (५५०००) परिमिताः श्लोकाः सन्ति ।

२.१२.३ विष्णुपुराणम् ।

अस्मिन् विष्णुपुराणे श्लोकानां संख्या निर्धारिता प्रतिपादिता वर्तते तद्यथा –

त्रयोविंशतिसाहस्रं वैष्णवमिति कथ्यते ।

अनेन प्रकारेण विष्णुपुराणेत्रयोविंशतिसहस्र (२३०००) परिमिताः श्लोकाः सन्ति ।

२.१२.४ वायुपुराणम् ।

एतद् वायुपुराणमेव स्वस्य श्लोकसंख्यामनेन पद्येन विज्ञापनं भवति तद्यथा –

चतुर्विंशत्साहस्रं वायवीयमिति कथ्यते ।

अनेन प्रकारेण वायुपुराणेत्रयोविंशतिसहस्र (२४०००) परिमिताः श्लोकाः सन्ति ।

१.१२.५ श्रीमद्भागवतपुराणम् ।

द्वादशस्कन्धयुतस्य श्रीमद्भागवतपुराणस्य श्लोकसंख्याविषये श्लोकोयं विज्ञापयति यद् -

अष्टादशसहस्राणि तद्भागवतमुच्यते ।

अनेन प्रकारेण श्रीमद्भागवतपुराणे अष्टादशसहस्र (१८०००) परिमिताः श्लोकाः सन्ति ।

२.१२.६ नारदपुराणम् ।

एतद् नारदपुराणमेव स्वस्य श्लोकसंख्यां पद्यमिदमनेन प्रकारेण कथयति यथा -

पञ्चविंशत्सहस्राणि नारदीयमिति कथ्यते ।

अनेन प्रकारेण नारदपुराणेत्रयोविंशतिसहस्र (२५०००) परिमिताः श्लोकाः सन्ति ।

२.१२.७ मार्कण्डेयपुराणम् ।

अस्य श्लोकस्य कथनानुसारमस्मिन् मार्कण्डेयपुराणे श्लोकाः सन्ति तद्यथा -

पुराणं नवसाहस्रं मार्कण्डेयमिहोच्यते।

अस्मिन् मार्कण्डेयपुराणे नवसहस्र (९०००) परिमिताः श्लोकाः सन्ति ।

२.१२.८ अग्निपुराणम् ।

एतत् सर्वत्रऋतुफलप्रदन्नाम अग्निपुराणमेव स्वस्य श्लोकसंख्यामनेन पद्येन कथयति यथा -

तच्च षोडशसाहस्रं सर्वर्त्तुफलप्रदम्।

अनेन प्रकारेण अग्निपुराणेत्रयोविंशतिसहस्र (१६०००) परिमिताः श्लोकाः सन्ति ।

२.१२.९ भविष्यपुराणम् ।

अस्य श्लोकस्य कथनस्यानुसारमस्मिन् भविष्यपुराणे श्लोकाः सन्ति तद्यथा -

चतुर्विंशत्सहस्राणि तथा पञ्चशतानि च ।

भविष्यचरितप्रायं भविष्यं तदिहोच्यते।।

भविष्यपुराणे पञ्चशताधिकचतुर्विंशतिसहस्र (२४५००) परिमिताः श्लोकाः सन्ति ।

२.१२.१० ब्रह्मवैवर्तकपुराणम् ।

ब्रह्मवैवर्तनामके पुराणेस्मिन् श्लोकानां संख्या अनेन प्रकारेण वर्तते यथा -

तदष्टादशसाहस्रं ब्रह्मवैवर्तमुच्यते ।

अनया रीत्या ब्रह्मवैवर्तपुराणे अष्टादशसहस्र (१८०००) परिमिताः श्लोकाः सन्ति ।

२.१२.११ लिङ्गपुराणम् ।

एतद् लिङ्गपुराणमेव स्वस्य श्लोकसंख्याज्ञानमनेन पद्येन कथयति यथा -

कल्पान्ते लैङ्गिकमित्युक्तं तदेकादशसाहस्रम् ।

अनेन प्रकारेण लिङ्गपुराणेत्रयोविंशतिसहस्र (११०००) परिमिताः श्लोकाः सन्ति ।

२.१२.१२ वाराहपुराणम् ।

वाराहपुराणं वा वराहपुराणमिति पुराणेस्मिन् श्लोकसंख्या अनेन प्रकारेण वर्तते यथा -

चतुर्विंशत्सहस्राणि तद्वाराहमिहोच्यते ।

अनया रीत्या वाराहपुराणे चतुर्विंशतिसहस्र (२४०००) परिमिताः श्लोकाः सन्ति ।

२.१२.१३ स्कन्दपुराणम् ।

एतत् स्कन्दपुराणमेव स्वस्य श्लोकानां संख्याज्ञानमनेन पद्येन कथयति यथा -

स्कन्दं नाम पुराणञ्च ह्येकाशीति निगद्यते ।

सहस्राणि शतञ्चैकम् ।

अनेन प्रकारेण स्कन्दपुराणे एकशतत्तरैकाशीतिसहस्र (८११००) परिमिताः श्लोकाः सन्ति ।

२.१२.१४ वामनपुराणम् ।

वामननामके पुराणेस्मिन् सर्वेषां श्लोकानां संख्या अनेन प्रकारेण वर्तते यथा -

पुराणं दशसाहस्रं वामनं परिकीर्तितम्।

अनया रीत्या वामनाख्ये पुराणे दशसहस्र (१००००) परिमिताः श्लोकाः सन्ति ।

२.१२.१५ कूर्मपुराणम् ।

एतत् कूर्मपुराणमेव स्वस्य श्लोकसंख्यामनेन पद्येन कथयति यथा -

कूर्मरूपी जनार्दनः । अष्टादशसहस्राणि ।

अनेन प्रकारेण कूर्मपुराणे अष्टादशसहस्र (१८०००) परिमिताः श्लोकाः सन्ति ।

२.१२.१६ मत्स्यपुराणम् ।

मत्स्यनामके पुराणेस्मिन् सर्वेषां श्लोकानां संख्या अनेन प्रकारेण वर्तते यथा –

तन्मत्स्यमिति जानीध्वं सहस्राणि चतुर्दश ।

अनया रीत्या मत्स्यपुराणे चतुर्दशसहस्र (१४०००) परिमिताः श्लोकाः सन्ति ।

२.१२.१७ गरुडपुराणम् ।

एतद् गरुडपुराणमेव स्वस्य श्लोकानां संख्याज्ञानमनेन पद्येन कथयति यथा –

गारुडं तदिहोच्यते अष्टादशसहस्राणि ।

अनेन प्रकारेण गरुडपुराणे अष्टादशसहस्र (१८०००) परिमिताः श्लोकाः सन्ति ।

२.१२.१८ ब्रह्माण्डपुराणम् ।

ब्रह्माण्डपुराणेस्मिन् श्लोकसंख्या कति वर्तते ? तदानेन प्रकारेण वर्तते यथा –

तच्च द्वादशसाहस्रं ब्रह्माण्डं द्विशताधिकम् ।

अनया रीत्या ब्रह्माण्डपुराणे द्वादशसहस्र (१२०००) परिमिताः श्लोकाः सन्ति ।

एतेषामष्टादशपुराणेषु प्रत्येकस्मिन् पुराणे कति श्लोकाः ? इति जिज्ञासानेन प्रकारेण शान्ता भवति ।

| क्रमः | पुराणनाम | श्लोकसंख्या |
|---|---|---|

| | | | |
|---|---|---|---|
| १ | ब्रह्मपुराणम् | १३००० | । |
| २ | पद्मपुराणम् | ५५००० | । |
| ३ | विष्णुपुराणम् | २३००० | । |
| ४ | वायुपुराणम् | २४००० | । |
| ५ | श्रीमद्भागवतपुराणम् | १८००० | । |
| ६ | नारदपुराणम् | २५००० | । |
| ७ | मार्कण्डेयपुराणम् | ९००० | । |
| ८ | अग्निपुराणम् | १६००० | । |
| ९ | भविष्यपुराणम् | २४५०० | । |
| १० | ब्रह्मवैवर्तकपुराणम् | १८००० | । |
| ११ | लिङ्गपुराणम् | ११००० | । |
| १२ | वाराहपुराणम् | २४००० | । |
| १३ | स्कन्दपुराणम् | ८११०० | । |
| १४ | वामनपुराणम् | १०००० | । |
| १५ | कूर्मपुराणम् | १८००० | । |
| १६ | मत्स्यपुराणम् | १४००० | । |
| १७ | गरुडपुराणम् | १८००० | । |
| १८ | ब्रह्माण्डपुराणम् | १२२०० | । |
| | | ----- | |
| | | ४१३८०० | |

अनेन प्रकारेण समस्तेषु पुराणेषु श्लोकानां संख्या अष्टशतोत्तरत्रयोदशसहस्राधिकचतुर्लक्ष (४१३८००) श्लोकाः सन्ति,

इत्थमधगाधे पुराणसमुद्रे किं किं वर्णनमस्ति ? इति समेषां जिज्ञासा शान्तये संक्षपेण पुराणेषु वर्ण्यविषयः प्रस्तूयते ।

अष्टादशपुराणानि सन्ति, तेषु वर्ण्यविषयाः पृथक्पृथगस्ति, संक्षेपेण वर्ण्यविषयः प्रस्तूयते यथा –

२.१३ पुराणेषु वर्ण्यविषयः ।

सम्प्रति अष्टादशानां पुराणानां ये वर्ण्यविषयाः सन्ति, ते सर्वे पुराणानां वर्ण्यविषयाःसंक्षेपेण प्रस्तूयन्ते यथा –

२.१३.१ ब्रह्मपुराणम् ।

सर्वेष्वष्टादशसु पुराणेषु सर्वप्राचीनं सर्वप्रथममाद्यं च ब्रह्मपुराणं वर्तते, इत्युल्लेखः प्रायः सर्वेषु पुराणेषु प्रदत्तो वर्तते, तस्मिन् ब्रह्मपुराणे त्रयोदशसहस्रं श्लोकाः (१३०००) वर्तन्ते, किन्तु नारदपुराणे, मार्कण्डेयपुराणेस्मिन् दशसहस्र (१००००) श्लोका वर्तन्त इति कथितमस्ति । अस्य पुराणस्य विषये प्राचीनताया निर्देशं नारदपुराणं प्रददाति यद् –

**ब्राह्मं पुराणं तत्रादौ सर्वलोकहिताय वै ।**
**व्यासेन वेदविदुषा समाख्यातं महात्मना ।।**
**तद्वै सर्वपुराणाग्र्यं धर्मकामार्थमोक्षदम्।**
**नानाख्यानेतिहासाद्यं दशसाहस्मुच्यते[1] ।।**
**आद्यमिदं ब्रह्मपुराणं भागद्वये विभक्तमस्ति ।**

१. पूर्वभागः ।

२. उत्तरभागः ।

[1] नारदपुराणम् अ. ९२

ब्रह्मपुराणस्य पूर्वभागे विशेषरूपेण मुख्यतया निम्नलिखिता विषया विवेचिताः सन्ति तद्यथा –

१. दक्षप्रजापतीनामुत्पत्तिः ।

२. देवासुरसंग्रामः ।

३. लोकेश्वरस्य भगवतो भास्करस्य वंशानुकीर्तनम् ।

४. चतुर्व्यूहावतारस्य भगवतः श्रीरामचन्द्रस्य वर्णनम् ।

५. सोमवंशस्य सच्चिदानन्दस्य भगवतः श्रीकृष्णचन्द्रस्य वर्णनम् ।

६. पराम्बिकायाः पार्वत्या जन्म ।

७. पराम्बिकायाः पार्वत्या विवाहस्येत्यादि रोचकपूर्णं वर्णनम् ।

ब्रह्मपुराणस्य उत्तरभागे विशेषरूपेण मुख्यतया निम्नलिखिता विषया विवेचिताः सन्ति तद्यथा –

१. भगवतः श्रीरामस्य श्रीकृष्णस्य चरितस्य वर्णनम् ।

२. वर्णाश्रमधर्माणां वर्णनम् ।

३. श्रीविष्णुनोपदिष्टानां धर्माणां वर्णनम् ।

४. साख्ययोगादिदर्शनानां प्रतिपादनम् ।

अन्ते च ब्रह्मपुराणस्य श्रवणस्य मननस्य च फलमनेन प्रकारेण कथितं यद् –

श्रृणोति यः पुराणन्तु ब्राह्मं सर्वजितेन्द्रियः ।
हविष्याशी च नियमात् स लभेद् ब्रह्मणः पदम् ।।
किमत्र बहुनोक्तेन यद् यदिच्छति मानवः ।

तत्सर्वं लभते वत्स ! पुराणस्यास्य कीर्तनात्[१] ।।

अनेन प्रकारेण ब्रह्मपुराणस्य पूर्वभागे मुख्यतया सप्तानां विषयाणां तथा उत्तरभागे चतुर्णां विषयाणां वर्णनं कृतमस्ति ।

२.१३.२ पद्मपुराणम् ।

अस्मिन् पञ्चपञ्चसहस्रयुते पञ्चखण्डान्विते पद्मपुराणे पञ्च खण्डाः सन्ति यथा –

१. सृष्टिखण्डः ।

२. भूमिखण्डः ।

३. स्वर्गखण्डः ।

४. पातालखण्डः।

५. उत्तरखण्डः ।

इदं पद्मपुराणम् एकचत्वारिंशदधिकषट्शत (६४१) अध्यायेषु विभक्तमस्ति । तथा श्लोकानां संख्या पञ्चपञ्चाशत्सहस्र (५५०००) श्लोकपरिमिता वर्तते तद्यथा –

१. पद्मपुराणस्य सृष्टिखण्डः ।

पद्मपुराणस्य सृष्टिखण्डे विशेषतया षण्णां विषयाणां वर्णनं पुराणकारेण कृतमस्ति तद्यथा –

१. पुलस्त्येन कृतस्य भीष्मं प्रति सृष्टिक्रमाद् धर्मस्य वर्णनम्।

२. पुष्करस्य माहात्म्यम् ।

३. ब्रह्मयज्ञवेदपाठदानादीनां वर्णनम् ।

४. पार्वत्याः पाणिग्रहणम् ।

---

[1] ब्रह्मपुराणम्

५. तारकासुरस्याख्यानम् ।

६. गवादीनां माहात्म्यञ्च ।

२. पद्मपुराणस्य भूमिखण्डः ।

पद्मपुराणस्य भूमिखण्डे विशेषतया सप्तानां विषयाणां वर्णनं पुराणकारेण कृतमस्ति तद्यथा -

१. मातापित्रोः शुश्रूषाया माहात्म्यम् ।

२. शिवधर्मस्य कथा ।

३. सुव्रतकथा ।

४. वृत्रासुरस्य वधः ।

५. पृथ्वाख्यानम् ।

६. वेण्वाख्यानम् ।

७. नहुषस्य ययातीनां चरितचित्रणम् ।

३. पद्मपुराणस्य स्वर्गखण्डः ।

पद्मपुराणस्य स्वर्गखण्डे विशेषतया पञ्चानां विषयाणां वर्णनं पुराणकारेण कृतमस्ति तद्यथा -

१. ब्रह्माण्डोत्पत्तिवर्णनम् ।

२. संातिद्वारा ऋषीन् प्रति नर्मदाया उत्पत्तिः ।

३. तीर्थस्थानानां वर्णनम् ।

४. वर्णाश्रमधर्मानुसारं कर्मयोगनिरूपणम्।

५. समुद्रमन्थनस्य वर्णनम् ।

४. पद्मपुराणस्य पातालखण्डः ।

पद्मपुराणस्य पातालखण्डे विशेषतया षण्णां विषयाणां वर्णनं पुराणकारेण कृतमस्ति तद्यथा –

१. रामराज्याभिषेकेगस्त्यस्यागमनम् ।

२. जगन्नाथस्य वर्णनम् ।

३. वृन्दावनस्य माहात्म्यम् ।

४. धरावराहसंवादः ।

५. कल्पान्तरीरामकथाया वर्णनम् ।

६. पद्मपुराणस्य उत्तरखण्डः ।

५. पद्मपुराणस्य सृष्टिखण्डे विशेषतया षण्णां विषयाणां वर्णनं पुराणकारेण कृतमस्ति तद्यथा –

१. शिवेन पार्वतीं प्रति कथिता पर्वकथा।

२. जालन्धरकथा ।

३. श्रीशैलस्य वर्णनम् ।

४. सागरगङ्गाकाशीगयादीनां पुण्यतीर्थानां माहात्म्यम् ।

५. जम्बूद्वीपस्य वर्णनम् ।

६. इन्द्रप्रस्थादीनां वर्णनम् ।

अन्ते च पद्मपुराणस्य श्रवणस्य मननस्य च फलमनेन प्रकारेण कथितं यद् –

**पञ्च खण्डयुतं पाद्मं यः शृणोति नरोत्तमः ।**
**स लभेत वैष्णवं धाम भुक्त्वा योगानीहेप्सितान् ।।**
**एतद् वै पञ्च पञ्चाशत्सहस्रं पद्मसंज्ञकम्।**
**पुराणं लेखयित्वा वै ज्येष्ठ्यां स्वर्णाज्यसंयुतम् ।।**

**यः प्रदद्यात् सुमतये पुराणज्ञाय मानद !**

**स याति वैष्णवं धाम सर्वदेवनमस्कृतः[1] ।।**

अनेन प्रकारेण पद्मपुराणे विशेषतया प्रदत्तानां विषयाणां वर्णनं पुराणकारेण कृतमस्ति तद्यथा -

२.१३.३ विष्णुपुराणम् ।

सर्वेषु पुराणेषु विष्णुपुराणस्य रचनाक्रमस्य दृष्ट्या तृतीयः क्रमो वर्तते । अस्मिन् विष्णुपुराणे श्लोकानां संख्या त्रयोविंशतिसहस्र (२३०००) परिमिता वर्तते । अध्यायानां संख्या षड्विंशत्युत्तरैकशत (१२६) परिमिता वर्तते । अस्मिन् षड् अंशाः सन्ति यथा -

१. प्रथमांशः ।

२. द्वितीयांशः ।

३. तृतीयांशः ।

४. चतुर्थांशः ।

५. पञ्चमांशः ।

६. षष्ठांशः ।

अस्य विष्णुपुराणस्य एतेषु षट्स्वंशेषु मुख्यतया पञ्च विषया विवेचिताः सन्ति तद्यथा -

१. विष्णुपुराणस्य प्रथमांशः ।

१. पराशरेण मैत्रेयायोपदिष्टः सृष्टिक्रमः ।

२. देवातानामुत्पत्तिः ।

३. समुद्रमन्थनम् ।

४. ध्रुवप्रह्लादयोश्चरित्रवर्णनम् ।

---

[1] पद्मपुराणम्

५. पृथ्वादीनां राज्ञां चरित्रवर्णनम् ।

(२) श्रीविष्णुपुराणस्य द्वितीयांशः ।

अस्य विष्णुपुराणस्य एतेषु षट्स्वंशेषु द्वितीयांशे मुख्यतया सप्त विषया विवेचिताः सन्ति तद्यथा -

१. राज्ञा प्रियव्रतेन स्वदशभ्यः पुत्रेभ्यः प्रदत्तं राज्यदानम् ।

२. भरतोत्पत्तिवर्णनम् ।

३. सप्तद्वीपानां तथा समुद्रस्य वर्णनम् ।

४. भारतादीनां नवखण्डानां विभागशो वर्णनम्।

५. सूर्यचक्रसंस्थानवर्णनम् ।

६. जडभरतेन रघुगणं प्रति प्रदत्त आत्मज्ञानोपदेशः ।

७. निदाघ-ऋभुसंवादः ।

(३) श्रीविष्णुपुराणस्य तृतीयांशः ।

अस्य विष्णुपुराणस्य एतेषु षट्स्वंशेषु तृतीयांशे मुख्यतया षड् विषया विवेचिताः सन्ति तद्यथा -

१. मन्वन्तराणामाख्यानम् ।

२. सावर्ण्यादिमनूत्पत्तिवर्णनम् ।

३. प्रतिद्वापरयुगस्य भिन्नभिन्नव्यासनामाख्यानम् ।

४. महापुराणानां भेदोपवर्णनम् ।

५. वर्णाश्रमधर्मनिरूपणम् ।

६. मायामोहासुरस्य संवादवर्णनम् ।

(४) श्रीविष्णुपुराणस्य चतुर्थांशः ।

अस्य विष्णुपुराणस्य एतेषु षट्स्वंशेषु चतुर्थांशे मुख्यतया नव विषया विवेचिताः सन्ति तद्यथा -

१. सूर्यवंशस्योत्पत्तिवर्णनम् ।

२. चन्द्रवंशस्योत्पत्तिवर्णनम् ।

३. मान्धातावंशस्य वर्णनम् ।

५. सगरस्योत्पत्तिः ।

६. निमियज्ञवर्णनम् ।

७. जनकोत्पत्तिकथा ।

८. पाण्डवानामुत्पत्तिकथा ।

९. कालिमाहात्म्यवर्णनम् ।

(५) श्रीविष्णुपुराणस्य पञ्चमांशः ।

अस्य विष्णुपुराणस्य एतेषु षट्स्वंशेषु पञ्चमांशे मुख्यतया षड् विषया विवेचिताः सन्ति तद्यथा –

१. वसुदेववेवकीविवाहः ।

२. कृष्णावतारकथा ।

३. कृष्णस्य बालक्रीडाया वधस्य वर्णनम् ।

४. धेनुकासुरादीनां वधस्य वर्णनम् ।

५. भगवत आज्ञया मुचकुन्दस्य बदरीकाश्रीगमनम् ।

६. परीक्षितस्य स्वर्गारोहणस्य वर्णनम् ।

(६) श्रीविष्णुपुराणस्य षठांशः ।

अस्य विष्णुपुराणस्य एतेषु षट्स्वंशेष्वन्तिमे षष्ठेंशे मुख्यतया षड् विषया विवेचिताः सन्ति तद्यथा –

१. कलियुगस्य धर्मवर्णनम् ।

२. चतुर्विधप्रलयवर्णनम् ।

३. आध्यात्मिकादित्रिविधतापानां वर्णनम् ।

४. नरकयातनाया निरूपणम् ।

५. केशिध्वजशाण्डिल्ययोः संवादः ।

६. श्रीविष्णुपुराणस्यान्ते श्रवणस्य तथा मननस्य फलमनेन प्रकारेण कथितं यद् -

**वाराहकल्पवृत्तान्तं व्यासेन कथितं त्विह ।**
**यो नरः पठते भक्त्या यः श‍ृणोति च सादरम् ।।**
**तावुभौ विष्णुलोकं हि व्रजेताम्भुक्तभोगकौ ।**
**तल्लिखित्वा च यो दद्याताषाद्यां धृतधेनुना ।।**
**सहितं विष्णुभक्ताय पुराणार्थविदे द्विजः ।**
**स याति वैष्णवं धाम विमानेनार्कवर्चसा ।।**
**यश्च विष्णुपुराणस्य समनुक्रमणीं द्विज ।**
**कथयेच्छृणुयाद्वापि स पुराणफलं लभेत्[1] ।।**

२.१३.४.१ वायुपुराणम् ।

सार्वजनीनं हितमुपदेष्टुं प्रवृत्तानां समेषां पुराणानां नामक्रम- संख्यासम्बन्धे महान् मतभेदो दृश्यते । विष्णु, श्रीमद्भागवत, मार्कण्डेय, ब्रह्मवैवर्त, कूर्म, वाराह, लिङ्ग, स्कन्दपुराणेषु चतुर्थपुराणस्थाने शिवपुराणस्योल्लेखो विद्यते, किन्तु मत्स्य, नारदीय, देवीभागवतेषु, शिवपुराणस्य स्थाने चतुर्थस्य वायुपुराणस्य नाम निर्दिष्टमस्ति । एवमेतत् पुराणेषु निर्दिष्टपुराणसूच्यनुसारं चतुर्थपुराणरूपेण द्वे पुराणे दृष्टिगोचरीभवतः - एकं शिवपुराणम् अपरञ्च वायुपुराणमिति । तत्र कतरन्महापुराणं कतरच्चोपपुराणमिति मन्तव्यमित्यत्र किमस्ति वास्तविकं रहस्यमिति समीक्षा जागर्ति ।

[1] विष्णुपुराणम्

कियन्तो विद्वांसः शिवपुराणं चतुर्थमहापुराणमिति स्वीकुर्वन्ति । केचिद् वायुपुराणमेव मन्यन्ते । कतिपये च समालोचकाः शिवपुराणं वायुपुराणञ्चैकमेवाङ्गीकुर्वन्ति । तेषां मते शिवपुराणान्तर्गतमेवास्ति वायुपुराणम् । यतो हि शिवपुराणस्य वायवीयसंहितायां वायुना प्रोक्तत्वात् तदेव वायुपुराणमिति नाम्ना प्रसिद्धमस्ति । बंगलाविश्वकोशकारेण च द्वयोः पुराणयोर्नाम्नैकस्यैव शिवपुराणस्य सूची प्रदत्ता वर्तते, तन्मतेपि शिवपुराणस्यैव नामान्तरमस्ति वायुपुराणम् , अतः शिवपुराणात् तद्वायुपुराणं किञ्चिदपि भिन्नं नास्ति यथा हि -

**यथा शिवस्तथा शैवपुराणं वायुनोदितम् ।**
**शिवभक्तिसमायोगान्नामद्वयविभूषितम् ।।**

तन्न युक्तिसहं प्रमाणपुष्टं च । ‘ एसियाटिकसोसायटी’ कालिकातातः, आनन्दाश्रमसंस्कृतग्रन्थावलीपूनातः, म. म. पण्डितेन पञ्चाननतर्करत्नेन सम्पादितबंगवासिप्रेससंस्करणतः, गुरुमण्डलग्रन्थमालायां कालिकातातश्च प्रकाशितस्य वायुपुराणस्य विषयसूची वेकटेश्वरप्रेसबम्बईतः, पण्डितपुस्तकालयवाराणसीतश्च प्रकाशितस्य शिवपुराणस्य विषयसूचीतः सर्वथा भिन्नमस्ति । अतो वायुपुराणं शिवपुराणान्तर्गतमिति स्वीकरणे न कापि हानिः । मतमिदमपि प्रामाणिकमस्ति । तस्माच्छिवपुराणं वायुपुराणस्य विकल्पाङ्गीकरणमेव युक्तियुक्तं प्रामाणिकं च । किं चारबयात्रिणा ‘अल्वेरुणिनापि स्वकीये भारतभ्रमण’ नामके पुस्तके पुराणानां सूचीद्वयं प्रदत्तमस्ति । तत्रैकस्यां सूच्यां वायुपुराणस्योल्लेखो विद्यते, अपरस्यां सूच्यां च वायुपुराणस्य स्थाने शिवपुराणस्य नाम निर्दिष्टमस्ति । अपि च साम्प्रतं शिवपुराण-वायुपुराणनाम्ना प्रकाशिते

विषयभेदान्विते हस्तलिखिते च भिन्ने भिन्ने द्वे पुराण उपलब्धे स्तः । उभयोरपि पुराणयोराकारप्रकारवर्ण्यविषया भिन्ना भिन्ना उपलभ्यन्ते । अतस्तयोर्द्वयोः स्वरूपमुपस्थापयितुमत्यावश्यकं मत्वा तयोः स्वरूपं वर्ण्यविषयाश्च पृथक्पृथग् मन्तव्यम् । अनेन प्रकारेण 'पुराणेषु वायुपुराणस्य स्थानम्' इति प्रतिपाद्योपप्रकरणमिदं विस्तारभयात् समाप्यते ।

२.१३.४.२ शिवपुराणस्य स्वरूपम् ।

शिवपुराणस्योमासंहितायां लिखितमस्ति यद् - यस्य पुराणस्य पूर्वोत्तरखण्डे भगवतः शिवस्य पवित्रं चरित्रं विविधैः प्रकारैर्वर्णितमस्ति तत्पुराणस्य मर्मज्ञा विद्वांसश्चतुर्थं शिवपुराणं कथयन्ति यथा -

**यत्र पूर्वोत्तरे खण्डे शिवस्य चरितं बहु ।**
**शैवमेतत्पुराणं हि पुराणज्ञा वदन्ति च[1] ।।**

तत्र विद्वांसः कथयन्ति यत् - शिवपुराणं वा वायुपुराणं हि सप्तसु संहितासु विभक्तमस्ति यथा -

१. विद्येश्वरसंहिता ।
२. रुद्रसंहिता ।
३. शतरुद्रसंहिता ।
४. कोटिरुद्रसंहिता ।
५. उमासंहिता ।
६. कैलाससंहिता ।
७. वायवीयसंहिता ।

[1] शि. वा. सं.१।५९-६०

शिवपुराणस्य श्लोका इमे सप्तानां संहितानां प्रमाणं कुर्वन्तः प्रतिपादयन्ति यद् -

**विद्येश्वराख्या तत्राद्या द्वितीया रुद्रसंहिता ।**
**तृतीया शतरुद्राख्या कोटिरुद्रा चतुर्थिका ।।**
**पञ्चमी कथिता चोमा षष्ठी कैलाससंहिता ।**
**सप्तमी वायवीयाख्या सप्तैव संहिता इह[1] ।।**

शिवपुराणस्य सप्तसु संहितासु द्वितीयायां रुद्रसंहितायां पञ्च खण्डाः सन्ति यथा -

१. सृष्टिखण्डः ।
२. सतीखण्डः ।
३. पार्वतीखण्डः ।
४. कुमारखण्डः ।
५. युद्धखण्डः ।

अनेन प्रकारेण शिवपुराणस्य रुद्रसंहितायां पञ्च खण्डाः शिवपुराणकारेण प्रतिपादिताः सन्ति, अस्य शिवपुराणस्य सप्तम्यां वायवीयसंहितायामपि द्वौ भागौ वर्तेते यथा -

१. पूर्वार्द्धभागः ।
२. उत्तरार्द्धभागः ।

आसु सप्तसु संहितासु सङ्कलनया सप्तपञ्चाशदधिकचतुश्शतम् (४५७) अध्यायाः सन्ति । शिवपुराणस्य वायवीयसंहितायाः पूर्वार्द्धे तु द्वादशसंहितात्मकस्यापरस्यैकस्य

---

[1] शि. वा. सं.१।५९-६०

शिवपुराणस्यापि संकेतो वर्तते, यत्र लक्षैकसंख्यकाः श्लोकाः सन्ति यथा – शिवपुराणस्य श्लोका इमे स्पष्टीकुर्वन्ति यद् –

**तत्र शैवं तुरीयं यच्छार्वं तवार्थसाधकम् ।**
**गन्थौ लक्षप्रमाणं तद् व्यस्तं द्वादशसंहितम् ।।**
**विद्येश्वरं तथा रौद्रं वैनायकमुनत्तमम् ।**
**औमं मातृपुराणं तु रुद्रैकादशकं तथा[1] ।।**

अपरस्यापि प्रमाणस्य विषये शिवपुराणस्य पद्यमिदं विशेषरूपेण स्पष्टतां करोति यद् –

**कैलासशतरुद्रं च कोटिरुद्राख्यमेव च ।**
**सहस्रकोटिरुद्राख्यं वायवीयमतः परम्[2] ।।**

किन्तु साम्प्रतं द्वादशसंहितात्मकं शिवपुराणं नोपलभ्यते, परं भगवता व्यासदेवेन तदेव संक्षिप्तीकृत्य सप्तसंहितात्मकं चतुर्विंशतिसहस्रश्लोकं चतुर्थं शिवपुराणं तूपलभ्यत एव यथा –

**व्यासेन तत्तु संक्षिप्तं चतुर्विंशत्सहस्रकम् ।**
**शैवं तत्र पुराणं वै चतुर्थं सप्तसंहितम्[3] ।।**

प्रबुद्धशैवभक्तसमाजातिरिक्ते समुदाये जनसमुदायेपि शिवपुराणस्य श्रीमद्भागवतस्य च कथाश्रवणपठनपाठनस्यातीव महत्त्वं वर्तते । एतस्मात्कारणात् पुराणज्ञा लोककल्याणकारकस्य सर्वोपरि शिवपुराणस्यैव महत्त्वं स्वीक्रियते ।

---

[1] शि. पु. वा. सं. पूर्वार्द्धे १।५२

[2] शि. पु. वा. सं. पूर्वार्द्धे ७।१।५८

[3] अ. पुराणम् ३।८

तत्रभवन्तो जानन्त्येव यद्भगवान् शङ्करः परमकल्याणमयः । तस्य स्वरूपे लीलायां च परमं कल्याणकारितत्त्वं समुज्जृम्भते । अत एव रहवो मनीषिणः सांसारिकं प्रपञ्चं विहाय गाढभक्तिपुरस्सरं सततं शिवाराधनपरायणा दृश्यन्ते । एवं कृत्वा ते महानुभावा ऐहलौकिकं पारलौकिकं चाभीष्टं लभमाना एतादृशमानन्दमनुभवन्ति यत् सांसारिणां कृते यावज्जीवनमसमभवप्रायमेव । अतो भगवतः शङ्करस्य महिमा न केवलं भारते अपि तु निखिले जगतीतले येन केनापिरूपेण विद्यमाना सती स्वस्वश्रद्धविश्वासानुरूपं सर्वान् जनान् आप्याययति । भारते तु आकाश्मीरात् कन्याकुमारीपर्यन्तं नैकापि काचिदेवं स्थली न वर्तते, यद् यत्र शिवस्य तद्भक्तानां चाराधका न स्युः । ते सर्वत्र सन्ति अहर्निशं ते भगवतो निखिलेक्षणस्य गुणगुणान् गायमाना लोकस्य कल्याणं वितरन्ति । एतादृशानां महापुरुषाणां पुण्यपुञ्जबलादेव संसारे योगक्षेमं पूर्यते ।

अतः सर्वतोभावे सर्वसिद्धान्तसमर्थितेन स्वीकर्तव्यं यच्छास्त्रे वर्णितेषु अष्टादशमहापुराणेषु, उपपुराणेषु, औपपुराणेषु शिवपुराणस्य अतीव महत्त्वपूर्णं स्थानमस्ति ।

२.१३.४.३ शिवपुराणगता विषयाः ।

भगवतः महत्त्वसात्त्विकचरित्रैकतिहासविविधोदारतापूर्णानां कथानां विशदतया वर्णनं शिवपुराणस्यास्ति वैशिष्ट्यम् । अत्र शिवसम्बन्धिनां व्रतोपवासपूजापद्धतितपस्यायोगसाधनादीनां वर्णनं महदुत्कृष्टं विद्यते । प्रसङ्गतो ब्रह्माण्ड-भारतवर्ष-द्वीप-ग्रहस्थिति-कश्गपपत्नीनामपत्यवर्णनमिक्ष्वाकु वंश- मनुवंशवर्णनं च मनोहरं विद्यते । जनसाधारणानामशिवं

शमयितुं शिवमाहात्म्यस्य प्रतिपादकस्य शिवपुराणस्य पठनपाठनश्रवणमननैर्विविधतापसंतप्तानां प्राणिनां स्वान्ते शान्तिरुपजायते । अत एव बहवो मनीषिणः सांसारिकं प्रपञ्चमपहाय गाढभक्तिपूर्वकं भगवतः निटिलाक्षस्य गुणगणान् गायमानाः शिवाराधने तत्परा ऐहलौकिकं पारलौकिकं चाभीष्टं लभमना परमानन्दमनुभवन्तोनुदिनं लोककल्याणं कुर्वन्ति । अत्र हि साम्प्रतिके युगे भगवता द्वैपायनव्यासेन विरचितं समुपलब्धं शिवपुराणं सप्तसु संहितासु सुविभक्तमस्ति यथा -

२.१३.४.३.१ विद्येश्वरसंहिता ।

शिवपुराणस्य वायुपुराणस्य वा प्रथमायां संहितायां बहुशो विषया वर्णिताः सन्ति, किन्त्वत्र विशिष्टातिविशिष्टविषयाणां दिग्दर्शनं संक्षेपेणात्र प्रस्तूयते यथा - तीर्थराजप्रयागे मुनियज्ञावलोकनार्थं समागताय सूताय कलिदोषैः क्षीयमाणे वर्णाश्रमे धर्मे नृणां श्रेयःसाधनमधिजिगीषूणां मुनीनां प्रश्नस्योत्तरे शिवपुराणस्य कलिकल्मषध्वंसित्ववर्णनान्तरं संहिताभेदनिरूपणमस्ति । शिवलिङ्गस्य अर्चनान्मुक्तिप्राप्तिः, तथा विविधप्रकारैः सुगन्धितैः पुष्पैर्बिल्वपत्रैश्च पूजनस्य फलवर्णनम्, भस्मरुद्राक्षधारणमहत्त्वकथनम् , शिवनिर्माल्यभक्षणनिर्णयः, पार्थिवेश्वरस्य पूजनम् , परस्परेश्वरत्वाभिमानिनोः विष्णुब्रह्मणोः आहवेक्षिप्तमाहेश्वरपाशुपतास्त्राद् भीतानामराणां कैलासे गमनम् , विदिताभिप्रायस्य शम्भोः समरमागत्यानलस्तम्भाविष्कारेण विमनस्कयोः विष्णुब्रह्मणोः स्तम्भप्रमाणज्ञाने प्रवृत्तिः । तदनुपलब्धकेतकीपुष्पस्य कूटसाक्षित्वं विधाय दृष्टव्यापारोहमिति ब्रह्मोक्तेन विष्णुना

ब्रह्मगौरवस्वीकारः, ततः प्रसन्नस्य शम्भोर्विष्णवे स्वसाम्यप्रदानम् , शिवाक्षया विधिवधे प्रवृत्तमवलोक्य भैरवमच्युतेन प्रार्थितस्य शम्भोयसेतरत्रापूज्यत्वं विधाय विधावनुग्रहः, केतकीपुष्पस्य च स्वान्यत्र स्वीकारः । विष्णुविधिभ्यामर्चितोर्चनादिवसं शिवरात्रिसंक्षितं महाफलप्रदम् अभिधानस्वस्येश्वरत्वमभिदधे महेश्वर इति कथानकमस्ति ।

पार्थिवस्य पूजनप्रकारं प्रदर्श्यामुकामुकसमयेढ मुकामुकफलप्राप्तिरिति वर्णनम्, वैदिकविधिना पार्थिवस्य पूजाप्रकारमभिधाय कामनानुरोधेन लिङ्गसंख्याविधानं प्रकारान्तरेण तदर्चाया विधानम् , रुद्राक्षमहिमा, धारणविधिः, इत्यादयो नैके विषया शिवपुराणे महर्षिवेदव्यासेनातीव रोचकतया स्पृहणीयाः सन्ति ।

२.१३.४.३.२ रुद्रसंहिता ।

१. सृष्टिखण्डः ।

अस्मिन् रुद्रसंहितायाः सृष्टिखण्डे निर्गुणस्य शिवस्य शक्तिसम्बन्धेन प्रपञ्चनिर्माणस्य वर्णनम् , शिवदर्शनार्थं स्थितयो ब्रह्मविष्ण्वोः ओङ्कारनादश्रवणम् , ब्रह्माण्डोत्पत्तिः, पञ्चवक्त्रशिवसगुणमूर्तिप्रादुर्भावः, ततो वेदाधिगमः, लिङ्गपूजैव शिवसृष्टौ कारणम् , पुष्पविशेषैर्लिङ्गपूजने फलविशेषस्य कथनम् , ततोनेकविधसृष्टिवर्णनमतीव विशेषतया महर्षिवेदव्यासेन निरूपितं वर्तते ।

२. सतीखण्डः ।

दक्षप्रजापतेः पुत्र्या भगवत्याः सत्याः पावनं चरित्रमनेकविधैः विविधकामनाप्राप्तिभिश्च त्रिंचत्वाशित्स्वध्यायेषु निरूपितमस्ति, तत्रैव दक्षतनयया रत्या सह मदनस्य विवहावर्णनपूर्वकं सतीशिवयोर्विवाहोत्सवानन्तरं लीलया पृथिव्यामहतोः तयोः वने वियुक्तस्य श्रीरामचन्द्रस्य परीक्षाया अतीवमार्मिकः प्रसङ्गो वर्णितो वर्तते । तमेव प्रसङ्गमाधारीकृत्य गोस्वामिना श्रीतुलसीदासेन आत्मीये श्रीरामचरितमानसे मार्मिकं वर्णनं कृतमस्ति । पितुर्यज्ञे गतायाः सत्या दक्षावमानः, सर्वदेवानां तिरस्कारवर्णनम् , दक्षाय सत्या शिवमाहात्म्यस्य कथनम् । तत्रैव योगाग्निना सतीशरीरत्यागेन पवित्रपातिव्रत्यधर्मस्य अद्भूतमुदाहरणं प्रस्तुतं वर्णनम् , दक्षप्रजापतिः स्वस्यैव दुष्कृतप्रभावाद् वीरभद्रेण निहितशिरा जातः, तज्जनितदुःखेन खिन्नस्य ब्रह्मणो देवैः सह वैकुण्ठगमनम् , दक्षसंजीवनम् , देवैः सह कैलासगमनम्, शिवप्रसन्नार्थं विविधविस्तुतिः, वीरभद्रदग्धः शिरसः प्रजापतेः शिरःसन्धानाज्जीवनोपायकथनम् , यज्ञानुसन्धानं सतीखण्डे श्रवणस्य पठनस्य च फलप्राप्तिकथनमस्मिन् रुद्रसंहितायाः सतीखण्डे महर्षिवेदव्यासेन निरूपितं वर्तते ।

३. पार्वतीखण्डः ।

शिवपुराणस्य पार्वतीखण्डेस्मिन् पञ्चपञ्चाशत्स्वध्यायेषु पर्वतराजस्य हिमालयस्य भार्यायां मेनायां द्वितीये जन्मनि पार्वतीनाम्ना प्रसिद्धायाः तस्याः पूवपतिं भगवन्तं शिवं पतिरूपेण पुनः प्राप्तुं घोरतपश्चर्यानुष्ठानसमये कामदहनम् , परीक्षायै समागतेन

जटिलब्रह्मचारिवेषेण शिवेन सह भगवत्याः पार्वत्याः संवादोढ त्यन्तरुचिकरो वर्णितः, यस्य शब्दतोर्थतश्च कुमारसम्भवे महाकाव्ये कविकुलकलाधारेण महाकविना कालिदासेन स्पष्टतरः प्रभावः प्रतिष्ठापितः । ततः शिवपार्वतीविवाहविधिवर्णनम् , वधूवरयोर्यात्रा प्रसङ्गे मेनायाः पार्वत्यै शिक्षणव्याजेन पातिव्रत्यधर्मस्योपदेशः । लौकिकरीत्यापि सर्वविवाहकृत्यं निवर्त्य शिवाशिवयोः कैलासगमनमित्यादयो विषया वर्णिताः सन्ति ।

४. कुमारखण्डः ।

शम्भोर्दिव्यसहस्रं गिरिजया सह लीलाविहारवर्णनं तारकाद्यसुराणां विष्णुपुरोगानां शिवसन्निधौ दुःखनिवेदनम् । ततः क्रमशो विंशतिषु (२०) अध्यायेषु कार्तिकेयजन्मकथाप्रसङ्गः, ततो हरब्रह्मादिदेवानां स्वायुधप्रदानपूर्वकं कार्तिकेयाभिषेककरणम् , तारकेण सहेन्द्रादिदेवानां युद्धवर्णनम् , ततो देवानाम् असुराणां च संग्रामः, तारकेण वीरभद्रविष्णोर्घोरयुद्धम् , स्वामिकार्तिकेयद्वारा तारकवधः, कुमारे बाणप्रलम्बः, ततो देवः प्रीतः सन् शिवाशिवाभ्यां सहैव कार्तिकेयस्य स्तुतिः, गणेशोत्पत्तिः, तस्य काये गजमुखस्य योजनम् , गणेशपूजाया प्राथम्यस्य निरूपणम् , तद्विवाहादिका नैके रुचिकरा विषया अस्मिन् कुमारखण्डे वर्णिताः सन्ति ।

५. युद्धखण्डः ।

त्रिपुराय कमलाक्षतपःप्रीतेन ब्रह्मणा वरप्रदानम् , तारकादिदेवानां तद्वधाय शिवस्तुतिः, शिवोपदेशाद् देवानां विष्णुप्रार्थनम् , त्रिपुरमोहनार्थं विष्णुना निजस्योत्पादनम् ,

नियमधर्मवर्णनम् , त्रिपुरवधाय विश्वकर्मरथनिर्माणम् , शिवस्य युद्धयात्रावर्णनम् , त्रिपुरदाहवर्णनम् , रुद्रनेत्रोत्थवाहिना समुद्राद् जलन्धरस्योत्पत्तिः , कालान्तरेण रुद्रेण जलन्धरस्य वधः, शङ्खचूडवधस्य प्रसङ्गः, पार्वतीप्रस्वेदतोन्धकजन्म, शिवद्वारा तस्य हिरण्याक्षयदानम् , तुलसीवृन्दादिसतीनां प्रसङ्गः, शिवशूलाग्रप्रोतान्धकस्य त्रिसहस्रवर्णपर्यन्तं तपश्चरणम् , बाणपुत्री उषा, अनिरुद्धप्रणयप्रसङ्गः, महिषपुत्रगजासुरस्य वधः, श्रीगौरीद्वारा विदलोत्पलदैत्यवधस्य वर्णनम् अतीव सुष्ठुतया युद्धखण्डेस्मिन् निरूपितमस्ति ।

२.१३.४.३.३ शतरुद्रसंहिता ।

अस्यां शतरुद्रसंहितायां मुख्यत्वेन वर्ण्यविषयाणां क्रमो द्विचत्वारिंशत्तसु (४२) अध्यायेषु शिवस्याष्टमूर्तिवर्णनप्रसङ्गः, द्वन्द्वप्रजासिसृक्षोः ब्रह्मणः तपश्चरणम् , अष्टाविंशतिद्वापरपर्यन्तशिवातरस्य कथनम् , कालभैरवस्य उत्पत्तिः, नृसिंहचरिते श्रीमहादेवस्य प्रतिवचनम् , उग्रतपोनिरतं विश्वानराख्यं मुनिं प्रति शम्भोः प्रतिज्ञा, दुर्वासोम्बरीषप्रसङ्गः, भगवतो मोहिनीस्वरूपस्य वर्णनम् , समुद्रमन्थनप्रसङ्गः, पिप्पलावतारः, इक्ष्वाकुवंशवर्णनम् , पार्वत्याः प्राप्तीच्छया शम्भोः सुनर्तकरूपेण तस्या याञ्चा, शम्भोरवतारवर्णनम् , किरातवेशधारेण शिवेन सह अर्जुनस्य युद्धवर्णनम् , अर्जुनाय पाशपतास्त्रप्रदानम् , श्रीशम्भोर्द्वादशज्योतिर्लिङ्गावतारस्य वर्णनादयो विषया अस्यां शतरुद्रसंहितायां प्रतिपादिताः सन्ति ।

२.१३.४.३.४ कोटिरुद्रसंहिता ।

शिवपुराणस्यास्यां कोटिरुद्रसंहितायां चतुर्थीकोटिरुद्रसंहितायां क्रमशो लिङ्गमाहात्म्यवर्णने द्वादशज्योतिर्लिङ्गवर्णनम् , अनसूयादितपसो वर्णनम् , अन्धवेश्वरमाहात्म्यम् , सोमेश्वरमल्लिकार्जुनस्य, महाकालस्य, केदारेश्वरस्य, भीमेश्वरादिलिङ्गानां विवेचनम् , शिवसहस्रनामवर्णनम् , शिवरात्रिमहिम्नो वर्णनम् , शिवस्य सगुणनिर्गुणभेदादयो विषया अत्र कोटिरुद्रसंहितायां वर्णिताः सन्ति ।

२.१३.४.३.५ उमासंहिता ।

शिवपुराणस्यास्यां पञ्चम्यामुमासंहितायां श्रीउपमन्युकृष्णसंवादस्य वर्णनम् , श्रीशिवेन श्रीद्रौपद्रीकामाभीष्टवरप्रदानम् , दाशरथे श्रीरामचन्द्राय वरस्य प्रदानम् , तेन च रावणं विजित्य जानक्युपलब्धिः, मायाया वर्णनम् , पापभेदाद् विविधनरकानां नरकयातनानां च वर्णनम् ,दानमहिमा, तर्पणमाहात्म्यम् , कर्मानुसारिजीवानां फलभोगवर्णनम् , ब्रह्माण्डवर्णने सप्तद्वीपानां च वर्णनम् , ग्रहाणां स्थितिः, मानवजन्मप्राशस्त्यवर्णनपूर्वकं शिवलोकप्राप्तिवर्णनम् , नरस्य स्त्रीत्वप्राप्तिवर्णनम् , मृत्युकालज्ञानवर्णनम् , चतुर्दशमन्वन्तरानुकीर्तनम् , सूर्यसंज्ञावर्णनम् , पितृश्राद्धपितृसर्गादीनां वर्णनम् , सत्यवत्यां पराशराद् व्यासोत्पत्तिकथनम् , देवीचरित्रवर्णने सुरथसमाधिकथानकम् , महिषासुरस्य कथाप्रसङ्गः, शुम्भनिशुम्भवर्णनम् , धूम्रलोचनचण्डमुण्डकथादशमहाविद्योत्पत्तिः,

ज्ञानक्रियाभक्तियोगवर्णनम् , प्रतिमास्थापनादयो नैके विषया अत्र निरूपिताः सन्ति ।

२.१३.४.३.६ कैलाससंहिता ।

शिवपुराणस्यास्यां षष्ठ्यां कैलाससंहितायां कैलाससंहिताया माहात्म्यस्य वर्णनोत्तरकाशीक्षेत्रवर्णनम् , दीक्षाग्रहणे ॐकारमाहात्म्यवर्णनम् , पूजास्थानमण्डपनिर्माणविधिः, षोडशोपचारपूजाविधानकथनम् , प्रणवविधानस्य उक्तिः, लिङ्गपूजाविधिवर्णनम् , नान्दीश्राद्धब्रह्मयज्ञादीनां वर्णनम् , प्रणवजपरात्रौ गायत्रीजपविधिवर्णनम् , सगुणस्वरूपवर्णनम् , शिवशक्तयोः स्वरूपवर्णनम् , पतीनां गुरुत्वशिष्यत्वकरणविविधवर्णनम् , क्षीरस्नानविधिः, यतीनामन्त्यष्टि- संस्कारविधिरित्यादिकं नैकं विविधं ज्ञानमत्र शिवपुराणस्यास्यां षष्ठ्यां कैलाससंहितायां प्रतिपादितमस्ति ।

२.१३.५ वायवीयसंहिता ।

अस्या वायवीयसंहिताया द्वौ भागौ वर्तेते, यथा –

१. पूर्वार्द्धः ।

२. उत्तरार्द्धः ।

प्रथमं तावद् वायवीयसंहिताया प्रथमभागस्य पूर्वार्द्धस्य चर्चां करिष्यामो यथा – शिवपुराणस्यास्यां सप्तम्यां वायवीयसंहितायामपि अन्यसंहितावद् विविधविषयाणां विवेचनं दृश्यते यथा – वेदादिचतुर्दशविद्याविर्भावकथनम् , पुराणसंख्यालक्षणादिवर्णनम् , शिवकृपातो जीवानां मुक्तिः,

पशुपतिशब्दार्थस्य विवेचनम् , शिवानुगतकालकथनम् , ऋषीणां वायुं प्रति शिवस्य क्रीडाविषयकस्य वर्णनम् , प्रतिकल्पे रुद्रोत्पत्तिकवचनमर्धनारीश्वररूपेण सृष्टिकल्पना, दक्षादीनां चोत्पत्तिः, सतीकथानकम् , वीरभद्रोत्पत्तिः, तपस्तप्तुं मन्दराचले शिवस्य गमनम् , कालीव्यभिहिताशिवावर्णनम् , वागर्थाविव विश्वस्य शिवाशिवयोः सम्बन्धकथनम् , मोक्षप्रापके श्रेष्ठत्वेन शैवधर्मस्य चर्चा, पाशुपतव्रतविधिः, भस्मधारणमहिम्नो कथनम्, उपमन्युचरित्रवर्णनम् , उपमन्यवे वरप्रदानम् , इत्यादयो विषया अतीवमनोहारिरूपेण वायवीयसंहितायाः पूर्वार्द्धे वर्णितास्सन्ति ।

२. उत्तरार्द्धः ।

सप्तम्यां वायवीयसंहितायां शैवतन्त्रसम्बद्धाया उपासनापद्धतेर्विशदं विवेचनं शैवागमसिद्धान्तानां निरूपणम् , शैवतान्त्रिकाणां मनोविनोदाय परमं साधनमुपयोगि च वर्तते तथा हि - पुत्रकामनया शिवसन्निधिगतस्य भगवतः श्रीकृष्णस्य पाशुपतव्रतस्य विधिः, ऋषिप्रश्नानामनुसारं पाशुपतज्ञानस्योल्लेखः,

सर्व शिवमयं जगत् ।

इत्यस्य विवेचनम् । शिवस्य सर्वमयत्वम् , शिवद्वारेव जगत उत्पत्तिकथनम् , वेदान्तानुरोधेन शिवतत्त्वज्ञानम् , युगे युगे शिवस्य योगावताराः, गौरीपूजने शिवस्यैव प्राधान्यम् , ॐनमः शिवाय, इति पञ्चाक्षरमहामन्त्रस्य माहात्म्यकथनम् , पञ्चाक्षरमन्त्रद्वारेव कलिकलुषविध्वंसनम् । पञ्चाक्षरमन्त्रजपविधानम् , शिवदीक्षाविधानम् , गुरोः शिष्ययोग्यताविचारः, साधकसंस्कारमन्त्रमाहात्म्यम् , आचार्यमहत्त्वम् ,

नित्यनैमित्तिककर्मानुष्ठानम् , शैवागमोक्तपूजाविधिकथनम् , शैवानां लिङ्गस्य पूजाविधानम् , पूजोपकरणानां विधिवद्विवेचनम् , शिवलिङ्गपूजनेनोग्रतमस्य पापस्य विध्वंसनम् , अग्निकार्ये कुण्डादिविधानकथनम् , शिवपुराणोक्तपूजा – जपहोम–तपोदानादिकथनम् , नित्यकर्मणां लिङ्गकुबेरप्रतिष्ठाविधानम् , शिवस्य सपरिकरलिङ्गप्रतिष्ठापनस्य विधिकथनम् , शिवध्यानयोगस्य वर्णनम् , नैमिषारण्यस्य यात्रावर्णनम् , स्कन्दसरःसविधमागतस्यर्षिभ्यः शैवज्ञानप्राप्तिकथनम् , शिवपुराणस्य माहात्म्यनिरूपणमपि महानुल्लासकरो विद्यते ।

अस्यां वायवीयसंहितायामेतावज्ज्ञानं विज्ञाय सर्वेषां प्राणिनां महानुपकारी कश्चिच्छिवसाधकः सकलतावारश्चेति प्रतिपादयन् श्लोकमिमं कथयति यद् –

**शैवं पुराणमिदमात्मविदां वरिष्ठं**
**सेव्यं सला परमवस्तु सतां समर्च्यम् ।**
**तापत्रयाभिशमनं सुखदं सदैव**
**प्राणप्रियं विधिहरीशमुखमराणाम् ।।**

अन्ते च वायुपुराणस्य श्रवणस्य मननस्य च फलमनेन प्रकारेण कथितं यद् –

**एतच्छिवपुराणं हि शिवस्यातिप्रियं परम् ।**
**भुक्तिमुक्तिप्रदं ब्रह्म संमितं भक्तिवर्धनम् ।।**
**एतच्छिवपुराणस्य वक्तुः श्रोतुश्च सर्वदा ।**
**सगणः ससुतः साम्बश्शङ्करोतु स शङ्करः[१] ।।**

[1] शिवपुराणम्

२.१३.६ श्रीमद्भागवतपुराणम् ।

'विद्यावतां भागवते परीक्षा' इत्यनुसारं सम्प्रति लोकप्रसिद्धं लोकभोग्यं च श्रीमद्भागवतपुराणस्य वर्ण्यं विषयमयं श्लोकः कथयति यद् -

**यत्राधिकृत्य गायत्री वर्ण्यते धर्मविस्तरः ।**
**वृत्रासुरवधोपेतं तद्भागवतमिष्यते ।।**

श्रीमद्भागवतपुराणेस्मिन् प्राग् गायत्रीमुपक्रम्य धर्मविस्तरो वर्णितः । अस्य गायत्री विलक्षणा यथा -

**ॐ सर्वचैतन्यारूपां तामाद्यां विद्याञ्च धीमहि ।**
**बुद्धिं यो नः प्रचोदयात् ।।**

पुराणविदः पुराणान्तरेभ्योस्य श्रीमद्भागवतपुराणस्य प्राधान्यं समामनन्ति । तदुपपादप्रमाणत्वेन चोदाहरन्ति यथा -

**शृणु राजन् प्रवक्ष्यामि पुराणं गुह्यमद्भुतम् ।**
**पुण्यं भागवतं नाम नानाख्यानयुतं शुभम् ।।**

अस्य श्रीमद्भागवतपुराणस्य द्वादशस्कन्धाः सन्ति, तेषु द्वादशसु स्कन्धेषु निम्नलिखिता विषया विवेचिताः सन्ति तद्यथा -

१. श्रीमद्भागवतस्य प्रथमः स्कन्धः ।

१. सूतशौनकादि-ऋषीणां वर्णनम् ।

२. विष्णुशक्तिप्रशंसा ।

३. देवीमाहात्म्यम् ।

४. हयग्रीववर्णनम् ।

५. मधुकैटभवर्णनम् ।

अस्य श्रीमद्भागवतपुराणस्य प्रथमस्कन्धे प्रदत्तानामेतेषां विषयाणां विवेचनं कृतमस्ति, सम्प्रति श्रीमद्भागवतपुराणस्य द्वितीयस्य स्कन्धस्य विषयाणां दर्शनं कुर्मस्तद्यथा –

२. श्रीमद्भागवतस्य द्वितीयः स्कन्धः ।

१. शान्तनूत्पत्तिः ।

२. भीष्मोत्पत्तिः ।

३. भीष्मप्रतिज्ञा ।

४. सत्यव्रत्या विवाहः ।

५. कौरवपाण्डवानामुत्पत्तिः, तेषां राज्यम् ।

६. तक्षकस्य कथा ।

७. परीक्षितस्य अभिशापः ।

८. परीक्षितस्य मृत्युः ।

९. जनमेजयस्य विवाह–सर्पयज्ञौ ।

१०. जरत्कारु–आस्तीकयोः कथा ।

अस्य श्रीमद्भागवतपुराणस्य द्वितीयस्कन्धे प्रदत्तानां दशानामेतेषां विषयाणां विवेचनं कृतमस्ति, सम्प्रति श्रीमद्भागवतपुराणस्य तृतीयस्य स्कन्धस्य विषयाणां दर्शनं कुर्मस्तद्यथा –

३. श्रीमद्भागवतस्य तृतीयः स्कन्धः ।

१. सांख्यनिरूपितप्रधानप्रकृतिमनुसृत्य देव्या वर्णनम् ।

२. वीरसेनस्य कथा ।

३. जयद्रथस्य द्रौपदीहरणम् ।

४. शशिकलायाः स्वयंवरस्य वर्ण्णनम् ।

५. सुदर्शनादिकथा ।

६. रामरावणादिकथा ।

७. रावणवधश्च ।

अस्य श्रीमद्भागवतपुराणस्य तृतीयस्कन्धे प्रदत्तानां सप्तानामेतेषां विषयाणां विवेचनं कृतमस्ति, सम्प्रति श्रीमद्भागवतपुराणस्य चतुर्थस्य स्कन्धस्य विषयाणां दर्शनं कुर्मस्तद्यथा –

४. श्रीमद्भागवतस्य चतुर्थः स्कन्धः।

१. कश्यपस्य गोहरणम् ।

२. दितिकथा ।

३. उर्वश्या उत्पत्तिः ।

४. प्रह्लादस्य कथा ।

५. नरनारायणयोर्युद्धम् ।

६. इन्द्रेण सह युद्धम् ।

७. पराजितदैत्यानां शुक्रसमभ्यर्णे गमनादिकम् ।

अस्य श्रीमद्भागवतमहापुराणस्य चतुर्थस्कन्धे प्रदत्तानां सप्तानामेतेषां विषयाणां विवेचनं कृतमस्ति, सम्प्रति श्रीमद्भागवतपुराणस्य पञ्चमस्य स्कन्धस्य विषयाणां दर्शनं कुर्मस्तद्यथा –

५. श्रीमद्भागवतस्य पञ्चमः स्कन्धः ।

१. प्रियव्रतचरितम् ।

२. नाभेश्चरितम् ।

३. भरतस्य पुलहाश्रमगमनं तपश्चरणं च।

४. रहूगणाय जडभरतस्य ज्ञानोपदेशः ।

५. भवाटवीवर्णनम् ।

६. भरतवंशवर्णनम् ।

७. भूगोलवर्णनम् ।

८. किम्पुरुषभारतवर्षयोर्वर्णनम् ।

९. चन्द्रादिग्रहाणां स्थितेर्गतेश्च वर्णनम् ।

१०. विष्णुपदस्य शिशुमारचक्रस्य वर्णनम् ।

११. विभिन्नानां नरकगतीनां च वर्णनम् ।

अस्य श्रीमद्भागवतपुराणस्य षड्विंशत्यध्याययुक्ते पञ्चमस्कन्धे प्रदत्तानामेकादशानामेतेषां विषयाणां विवेचनं कृतमस्ति, सम्प्रति श्रीमद्भागवतपुराणस्य षष्ठस्य स्कन्धस्य विषयाणां दर्शनं कुर्मस्तद्यथा –

६. श्रीमद्भागवतस्य षष्ठः स्कन्धः ।

१. अजामिलोपाख्याने विष्णुदूतस्य यमदूतस्य च संवादः ।

२. विष्णुदूतमुखेन श्रीमद्भागवतधर्मनाममाहात्म्यस्य निरूपणम्।

३. दक्षजन्म ।

४. दक्षकृततपसोवसाने भगवतां दर्शनं हंसगुह्यस्तोत्रम्।

५. दक्षभगवत्संवादश्च ।

६. दक्षस्य षष्टिकन्यायां वंशविस्तारः ।

७. विश्वरूपद्वारा इन्द्राय नारायणवर्मोपदेशः ।

८. इन्द्रवृत्रयुद्धं तत्र वृत्रस्य वधः ।

९. चित्रकतेवेङ्गिरोनारदयोरुपदेशः ।

१०. दितिवंशवर्णनं मरुतामुत्पत्तिश्च ।

११. पुंसवनव्रतविधिश्चत्यादिकं वर्णनम् ।

अस्य श्रीमद्भागवतपुराणस्य एकोनविंशत्यध्याययुक्ते षष्ठे स्कन्धे प्रदत्तानामेकादशादामेतेषां विषयाणां विवेचनं कृतमस्ति, सम्प्रति श्रीमद्भागवतपुराणस्य सप्तमस्य स्कन्धस्य विषयाणां दर्शनं कुर्मस्तद्यथा –

७. श्रीमद्भागवतस्य सप्तमः स्कन्धः ।

१. नारदयुधिष्ठिरसंवादारम्भः ।

२. हिरण्यकशिपोस्तपसा तप्तानां देवानां प्रार्थनया ब्रह्मणा तस्मै वरप्रदानम् ।

३. हिरण्यकशिपुप्रह्लादसंवादः ।

४. प्रह्लादवधार्थं हिरण्यकशिपोः प्रयत्नः ।

५. दैत्यबालकेभ्यः प्रह्लादस्योपदेशः ।

६. प्रह्लादवधोद्यमः ।

७. स्तम्भान्नृसिंहावतारः ।

८. हिरण्यकशिपोर्वधः ।

९. ब्रह्मादिदेवकर्तृकं भगवत्स्तवनम् ।

१०. प्रह्लादेन कृता भगवत्स्तुतिः ।

११. प्रह्लादनरसिंहसंवादः, नृणां सनातनो धर्मः।

१२. वर्णधर्माः ।

१३. स्त्रीधर्माः ।

१४. देशकालादिविशेषेण गृहस्थधर्मनिरूपणम् ।

१५. गृहस्थानां कृते मोक्षधर्मनिरूपणम् ।

१६. नारदस्य स्वप्राग्जन्मवृत्तान्तकथनम् ।

अस्य श्रीमद्भागवतपुराणस्य सप्तमस्कन्धे प्रदत्तानां षोडशानामेतेषां विषयाणां विवेचनं कृतमस्ति, सम्प्रति श्रीमद्भागवतपुराणस्य अष्टमस्य स्कन्धस्य विषयाणां दर्शनं कुर्मस्तद्यथा –

८. श्रीमद्भागवतस्य अष्टमः स्कन्धः ।

१. यज्ञावतारचरितम् ।

२. गजेन्द्रकर्तृकं भगवत्स्तवनम् ।

३. ग्राहाद् गजेन्द्रस्य मोक्षणम् ।

४. गजग्राहयोः पूर्वजन्मचरितं तयोरुद्धारश्च ।

५. समुद्रमन्थनम् ।

६. समुद्रादुद्भूतहालाहलविषभयेन भीतैर्देवैः स्तुतस्य शिवस्य विषपानम्

७. उदधेरन्यान्यरत्नानामुत्पत्तिः ।

८. लक्ष्म्या आविर्भावः ।

९. मोहिनीरूपं दृष्ट्वा महादेवस्य मोहः ।

१०. भविष्यन्मन्वन्तरसप्तकवर्णनम् ।

११. वामनस्य प्रादुर्भावः ।

१२. बलिवामनयोः संवादः ।

१३. भगवतो विराड्दर्शनम् ।

१४. भगवत्कृतं बलेः प्रशंसनम् ।

१५. तस्मै वरप्रदानम् ।

१६. बलेः सुततललोकगमनं वामनस्योपेन्द्रपदेभिषेकः ।

अस्य श्रीमद्भागवतपुराणस्य त्रयोविंशत्यध्याययुक्तेष्टमे स्कन्धे प्रदत्तानां षोडशानामेतेषां विषयाणां विवेचनं कृतमस्ति, सम्प्रति श्रीमद्भागवतपुराणस्य नवमस्य स्कन्धस्य विषयाणां दर्शनं कुर्मस्तद्यथा –

९. श्रीमद्भागवतस्य नवमः स्कन्धः।

१. सूर्यवंशवर्णनम् ।

२. सुकन्याचरितं रेवतकन्याचरितं च ।

३. इक्ष्वाकुवंशवर्णनम् ।

४. त्रिशङ्कुकथा हरिश्चन्द्रचरितं च ।

५. श्रीरामचरितम् ।

६. निमिवंशवर्णनम् ।

७. चन्द्रवंशवर्णनम् ।

८. ययातिचरितम् ।

९. पूरुवंशवर्णनम् ।

१०. दुष्यन्तभरतयोश्चरितम् ।

११. अनुद्रुह्युतुर्वसयदूनां वंशवर्णनम् ।

१२. यदुवंशवर्णनं तत्र श्रीकृष्णावतारसूचनम् ।

अस्य श्रीमद्भागवतपुराणस्य नवमस्कन्धे प्रदत्तानां द्वादशानामेतेषां विषयाणां विवेचनं कृतमस्ति, सम्प्रति श्रीमद्भागवतपुराणस्य दशमस्य स्कन्धस्य विषयाणां दर्शनं कुर्मस्तद्यथा–

१०. श्रीमद्भागवतस्य दशमः स्कन्धः।

श्रीमद्भागवतमहापुराणस्य दशमस्कन्धस्य भागौ द्वौ वर्तेते, यथा –

१. पूर्वार्धः ।

२. उत्तरार्धः ।

१०.१. श्रीमद्भागवतस्य दशमस्कन्धस्य पूर्वार्धः ।

१. श्रीकृष्णावतारोपक्रमः ।

२. भगवतो देवकीगर्भेनुप्रवेशः ।

३. ब्रह्मादिदेवकृतं स्तवनं देवकीसान्त्वनं च ।

४. श्रीकृष्णप्रादुर्भावः ।

५. पूतनावधादारभ्य कालियदमनम् ।

६. भगवतो मधुरं वेणूनादमाकर्ण्य गोपीभिस्तद्गुणगानम् ।

७. इन्द्रमखभङ्गः ।

८. वेणुनादं श्रुत्वा आगतानां गोपीनां श्रीकृष्णेन सह संवादः।

९. रासारम्भः, तासां मानापनोदाय भगवतः अन्तर्धानम् ।

१०. गोपीगीतम् ।

११. युग्मगीतम् ।

१२. अक्रूरकृता भगवत्स्तुतिः ।

१३. चाणूरमुष्टिकादीनां मल्लानां निधनं कंसस्य वधश्च ।

१४. वसुदवदेवकीसान्त्वनम् ।

१५. उग्रसेनस्य राज्याभिषेकः ।

१६. उद्धवगोपीसंवादः ।

१७. भ्रमरगीतम् ।

इत्यादीनां नैकेषां विषयाणां श्रीमद्भागवतमहापुराणस्य दशमस्य स्कन्धस्य रुचिरप्रदं वर्णनमस्य पूर्वाधे वर्तते ।

१०. श्रीमद्भागवतस्य दशमस्कन्धस्य उत्तरार्धः ।

१. रामकृष्णयोर्जरानुसन्धेन सह युद्धम् ।

२. द्वारकादुर्गस्य निर्माणम् ।

३. कालयवनविनाशः।

३. प्रद्युम्नस्य जन्म ।

४. शम्बरासुरवधः ।

५. कालिन्दीमित्रविन्दासत्याभद्रालक्ष्मणादीनां भगवत्कर्तृकं पाणिग्रहणम्।

६. रुक्मिणीश्रीकृष्णयोः प्रणयकलहः ।

७. श्रीकृष्णसन्ततीनां वर्णनम् ।

८. नृगस्योद्धारः ।

९. देवर्षिनारदकर्तृकं भगवतो गृहचर्यादर्शनम् ।

१०. पाण्डवानां दिग्विजयः, शिशुपालवधः ।

११. सुदामोपाख्यानम् ।

१२. वेदस्तुतिः ।

१३. श्रीकृष्णलीलानामनुवर्णनम् ।

अस्य श्रीमद्भागवतपुराणस्य दशमस्कन्धस्य पूर्वार्धे उत्तरार्धे च प्रदत्तानामेतेषां विषयाणां विवेचनं कृतमस्ति, सम्प्रति श्रीमद्भागवतपुराणस्यैकादशस्य स्कन्धस्य विषयाणां दर्शनं कुर्मस्तद्यथा–

११. श्रीमद्भागवतस्य एकादशः स्कन्धः ।

१. ऋषीणां यदुकुलसंहाराय शापः।

२. वसुदेवाय देवर्षिनारदोपदेशः ।

३. भागवतधर्मस्य भागवतलक्षणस्य च वर्णनम्।

४. भगवतोवतारवर्णनम् ।

५. श्रीकृष्णसंवादोद्धवसंवादारम्भः ।

६. भगवतो विभूतीनां वर्णनम् ।

७. भक्तेः साधनस्य यमनियमादीनां च वर्णनम्।

८. परमार्थनिरूपणम् ।

९. यदुकुलसंहारवर्णनम् ।

१०. भगवतः परमधामगमनम् ।

अस्य श्रीमद्भागवतपुराणस्यैकादशस्कन्धे प्रदत्तां दशानामेतेषां विषयाणां विवेचनं कृतमस्ति, सम्प्रति श्रीमद्भागवतमहापुराणस्य द्वादशस्कन्धस्य विषयाणां दर्शनं कुर्मस्तद्यथा-

१२. श्रीमद्भागवतस्य द्वादशः स्कन्धः ।

१. कलियुगीयराजवंशानां वर्णनम्।

२. कलिधर्मनिरूपणम् ।

३. चतुर्विधप्रलयवर्णनम् ।

४. अथर्ववेदविभागः ।

५. पुराणलक्षणवर्णनम् ।

६. मार्कण्डेयाय भगवतः शङ्करस्य वरदानम् ।

७. श्रीमद्भागवते कथितविषयाणां संक्षेपतो विवरणम्।

अन्ते च श्रीमद्भागवतमहापुराणस्य महत्त्वं च वर्तते, यथा –

**निम्नगानां यथा गङ्गा देवानामच्युतो यथा ।**
**वैष्णवानां यथा शम्भुः पुराणानामिदं तथा ।।**
**क्षेत्राणां चैव सर्वेषां यथा काशी ह्यनुत्तमा ।**
**तथा पुराणव्रातानां श्रीमद्भागवतं द्विजाः[१] ।।**

अस्य श्रीमद्भागवतपुराणस्य श्रीमद्भागवतमहापुराणस्यान्तिमे द्वादशस्कन्धे प्रदत्तानामेतेषां विषयाणां विवेचिनं कृतमस्ति, सम्प्रति नारदपुराणस्य विषयाणां दर्शनं कुर्मस्तद्यथा –

२.१३.७ नारदपुराणम् ।

अस्मिन् नारदपुराणे नारदीयपुराणे वा द्वौ भागौ वर्तेते । यथा –

१. पूर्वभागः ।

२. उत्तरभागः ।

नारदस्य पुराणस्य पूर्वभागे वर्णनमस्ति यद् – पूर्वभागे चत्वारः पादाः सन्ति, तेषु पञ्चविंशत्युत्तरैकशत (१२५) अध्यायाः सन्ति, एवमुत्तरभागे द्वाशीति (८२) अध्यायाः सन्ति, तेषु सप्तोत्तरद्विशत (२०७) अध्यायाः सन्ति, नारदीयपुराणे श्लोकानां संख्या पञ्चविंशतिसहस्र (२५०००) परिमिता वर्तते । अस्य पुराणस्य परिचयमनेन श्लोकमाध्यमेन मत्स्यपुराणं ददाति यथा –

**यत्राह नारदो धर्मान् बृहत्कल्पाश्रयाणि च ।**
**पञ्चविंशतिसहस्राणि नारदीयं तदुच्यते[१] ।।**

---

[1] श्री. भा. पुराणम् १२।१३। १६-१७

२.१३.७.१ नारदपुराणस्य पूर्वभागस्य प्रथमपादः ।

१. सूतशौनकसंवादानन्तरं संक्षेपेण सृष्टिवर्णनम् ।

२.१३.७.२ नारदपुराणस्य पूर्वभागस्य द्वितीयपादः।

१. मोक्षोपयोगिज्ञानसाधनस्य वर्णनम् ।

२. वेदाङ्गानां निरूपणम् ।

२.१३.७.३ नारदपुराणस्य पूर्वभागस्य तृतीयः पादः ।

१. महातन्त्रानुसारं पाशविमोचनम् ।

२. मन्त्राणां शोधनम् ।

३. दीक्षादीनां वर्णनम् ।

४. मन्त्रद्वारा गणेशसूर्यविष्णुशिवशक्त्यादीनां स्तोत्राणि ।

२.१३.७.४ नारदपुराणस्य पूर्वभागस्य चतुर्थपादः ।

१. पुराणानां लक्षणानि ।

२. चैत्रादिमासानां तिथीनां पृथक् पृथग् व्रतानां विधानम् ।

२.१३.७.५ नारदपुराणस्य उत्तरभागः ।

१. एकादशीव्रतविधानम् ।

२. रुक्माङ्गदकथा ।

३. मोहिन्या उत्पत्तिः ।

४. काशीप्रयागकुरुक्षेत्रहरिद्वारादीनां तीर्थानां माहात्म्यस्य वर्णनम् ।

अन्ते च नारदपुराणस्य श्रवणस्य मननस्य च फलमनेन प्रकारेण कथितं यद् –

---

[1] मत्स्यपुराणम्

**यः शृणोति नरो भक्त्या श्रावयेद् वा समाहितः ।**
**स याति ब्रह्मणो धाम नात्र कार्या विचारणा ।।**
**यश्चानुक्रमणीमेतां नारदीयस्य वर्णयेत् ।**
**शृणुयाद्वैकचित्तेन सोपि स्वर्गगतिं लभेत्[१] ।।**

२.१३.८ मार्कण्डेयपुराणम् ।

अस्य मार्कण्डेयपुराणस्य साराशं वर्ण्यविषयमिदमेकमेव पद्यं कथयति यद् –

**यत्राधिकृत्य शकुनीन् धर्मान् धर्मविचारणा ।**
**व्याख्याता वै मुनिप्रश्ने मुनिभिर्धर्मचारिभिः ।**
**मार्कण्डेयेन कथितं मार्कण्डेयमिहोच्यते[२] ।।**

१. मार्कण्डेयं प्रति जैमिनेः प्रश्नाः ।
२. द्रोणायनपक्षिणां वर्णनम् ।
३. हरिश्चन्द्रोपाख्यानम् ।
४. वशिष्ठस्य विश्वामित्रं प्रति बको भवेति अभिशापः ।
५. विश्वामित्रस्य आडीभवेति प्रतिशापः, तयोः परस्परयुद्धम्।
६. प्राणिनां जन्ममरणनिरूपणे भार्गवब्राह्मणेन जडमतिसंवादः।
७. यमपुरुषसंवादः ।
८. दत्तात्रेयस्य कार्तिकेयस्य च संवादः ।
९. कुवलयाश्वोपाख्यानम् ।
१०. मन्दालसोपाख्यानम् ।

---

1 नारदपुराणम्

2 मात्स्यपुराणम्

११. मन्दालसया स्वपुत्रं प्रति वर्णाश्रमधर्मोपदेशः।

१२. श्रद्धाकल्पःसदाचारवर्णनम् ।

१३. सुबाहुकाशिराजयोः संवादः ।

मार्कण्डेयपुराणस्य वास्तविक आकारप्रकारस्तावानेव यावान् मार्कण्डेयेन क्रौष्टिकं प्रति वर्णितः । ततो व्यतिरिक्तविवृद्धाकारस्तु पश्चात् संकलितो विभाव्यते । अन्ते च मार्कण्डेयपुराणस्य श्रवणस्य मननस्य च फलमनेन प्रकारेण कथितं यद् –

**यः शृणोति नरो भक्त्या पुराणमिदमादरात् ।**
**मार्कण्डेयाभिधं वत्स लभेत् परमां गतिम् ।।**
**यश्च व्याकुरुते चैतच्छिवं स लभते पदम् ।**
**कार्तिक्यां द्विजवर्याय स लभेद् ब्रह्मणः पदम् ।।**
**शृणोति श्रावयेद्वापि पश्चादनुक्रमीमिमाम् ।**
**मार्कण्डेयपुराणस्य स लभेद् वाञ्छितं फलम्[१] ।।**

२.१३.९ अग्निपुराणम् ।

अग्निपुराणनामको ग्रन्थः समेष्वष्टादशसु पुराणेषु सर्वाधिको महत्त्वपूर्णो ग्रन्थो वर्तते, अस्मिन्नग्निपुराणेष्टादशानां विद्यानां साररूपेण वर्णनम् , धनुर्वेद, आयुर्वेद, गान्धर्ववेद, अर्थशास्त्र, दर्शन, व्याकरण, साहित्यादीनां शास्त्राणां संक्षेपेण वर्णनमस्ति । अग्निपुराणनामको ग्रन्थो भारतीयसाहित्यस्य संस्कृतेश्च विश्वकोशो वर्तते । अस्मिन् त्र्यशीत्यधिकत्रिशत (३८३) अध्यायाः सन्ति । नारदीयपुराणस्य अनुसारमस्मिन् पञ्चदशसहस्र (१५०००)

[1] मार्कण्डेयपुराणम्

श्लोकाः सन्ति, मत्स्यपुराणस्यानुसारम् अग्निपुराणे षोडशसहस्र (१६०००) श्लोकाः सन्ति । मत्स्यपुराणस्यायं श्लोकोयमग्निपुराणे कति श्लोकाः ? इति जिज्ञासां दूरीकरोति यद् –

**यत्तदीयशानकं कल्पं वृत्तान्तमधिकृत्य च ।**

**वसिष्ठयाग्निाना प्रोक्तमाग्नेयं तु प्रचक्षते ।।**

**तच्च षोडशसाहस्रं सर्वक्रतुफलप्रदम्[१] ।**

अस्मिन्नग्निपुराणे मुख्यतया निम्नलिखितानां विषयाणां वर्णनं दरीदृश्यते तद्यथा –

१. समेषामवताराणां कथावर्णनम् ।

२. सृष्टिप्रकरणम् ।

३. विष्णुपूजाग्निस्थापनादिकं वर्णनम् ।

४. शालिग्रामस्य पूजाविधिः ।

५. सर्वासां देवतानां प्रतिष्ठाया वर्णनम् ।

६. गङ्गादीनां तीर्थानां माहात्म्यम् ।

७. ज्योतिश्चक्रादिवर्णनम् ।

८. राज्याभिषेकादीनां राज्ञां धर्मकृत्यानां वर्णनम् ।

९. ब्रह्मचर्यादिधर्मवर्णनम् ।

१०. रसोक्तानां नीतीनां निर्देशः ।

११. योगशास्त्रस्य वर्णनम् ।

अन्ते च अग्निपुराणस्य श्रवणस्य मननस्य च फलमनेन प्रकारेण कथितं यद् –

**ब्रह्मज्ञानं ततः पश्चात्पुराणश्रवणे फलम् ।**

---

[1] अग्निपुराणम्

**एतदाग्नेयकं विप्र ! पुराणं परिकीर्तितम्[1] ।।**

२.१३.१० भविष्यपुराणम् ।

भविष्यपुराणे पञ्च पर्वाणि सन्ति तद्यथा –

१. ब्रह्मपर्व ।

२. वैष्णवपर्व ।

३. शैवपर्व ।

४. सौरपर्व ।

५. प्रतिसर्गपर्व ।

एषु पञ्चसु पर्वसु पञ्चोत्तरषट्शत (६०५) अध्यायाः सन्ति । नारदीयपुराणानुसारमस्मिन् चतुर्दशसहस्र (१४०००) श्लोकाः सन्ति, किन्तु मत्स्यपुराणस्य मतानुसारं श्लोकानां संख्या पञ्चशतोत्तरचतुर्दशसहस्र (१५५००) परिमिता वर्तते । अस्य भविष्यपुराणस्य परिचयमनेन पद्यमाध्यमेन मत्स्यपुराणं कथयति यद् –

**यत्राधिकृत्य माहात्म्यमादित्यस्य चतुर्मुखः ।**
**अघोरकल्पवृत्तान्तप्रसङ्गेन जगत्स्थितिम् ।।**
**मनवे कथयामास भूतग्रामस्य लक्षणम् ।**
**चतुर्दशसहस्राणि तथा पञ्चशतानि च ।**
**भविष्यचरितप्रायं भविष्यं तदिहोच्यते[2] ।।**

अस्मिन् भविष्यपुराणे प्रधानविषयत्वेन पञ्चसु पर्वसु निम्नलिखितानां विषयाणां विवेचनं कृतमस्ति तद्यथा –

१. सृष्टिस्थितिलयसहितम् आदित्यचरितस्य वर्णनम्

---

1 अग्निपुराणम्

2 मत्स्यपुराणम्

२.  पुस्तकलेखानां लेखकानां लक्षणम्

३.  सर्वेषां संस्काराणां कल्पानां च वर्णनम्

५.  ब्रह्मविष्णुशिवानां महिमवर्णनम्

६.  धर्मार्थकाममोक्षाख्यानां चतुर्विधानां पुरुषार्थानां वर्णनम्

अन्ते च भविष्यपुराणस्य श्रवणस्य मननस्य च फलमनेन प्रकारेण कथितं यद् -

**तल्लिखित्वा तु यो दद्यात् पौष्यां विद्वान् विमत्सरः ।**
**गुडधेनुयुतं हेमवस्त्रमायविभूषणैः ।।**
**वाचकं पुस्तकञ्चापि पूजयित्वा विधानतः ।**
**गन्धाद्यभोज्यभक्ष्यैश्च कृत्वा नीराजनादिकम्।।**
**यो वै जितेन्द्रियो भूत्वा सोपवासः समाहितः ।**
**स मुक्तः पातकैर्घोरैः प्रयाति ब्रह्मणः पदम्[1] ।।**

२.१३.११ ब्रह्मवैवर्तकपुराणम् ।

अस्मिन् ब्रह्मवैवर्तकपुराणे चत्वारः खण्डाः सन्ति यथा -

१.  ब्रह्मखण्डः ।

२.  प्रकृतिखण्डः ।

३.  गणेशखण्डः ।

४.  श्रीकृणजन्मखण्डः ।

श्रीकृष्णखण्डस्य भागद्वयमस्ति यथा -

१.  पूर्वभागः ।

२.  उत्तरभागः ।

---

[1] भविष्यपुराणम्

ब्रह्मवैवर्तकपुराणेस्मिन् षट्षष्ट्युत्तरद्विशत (२६६) अध्यायाः सन्ति । एष्वध्यायेषु अष्टादशसहस्र (१८०००) श्लोकाः सन्ति, मत्स्यपुराणस्य श्लोकोयं कथयति यद् –

**रथन्तरस्य कल्पस्य वृत्तान्तमधिकृत्य तु ।**
**सावर्णिना नारदाय कृष्णमाहात्म्यमुत्तमम् ।।**
**यत्र ब्रह्मवराहस्य चरितं वर्ण्यते मुहुः ।**
**तदष्टादशसाहस्रं ब्रह्मवैवर्तमुच्यते**[1] **।।**

१. सृष्टिप्रकरणम् ।

२. नारदब्रह्मणोर्विवादः ।

३. शिवलोकगमनम् ।

४. सावर्णिनारदयोः कृष्णमाहात्म्यविषयकः संवादः ।

५. प्रकृतेरंशभूतानां कलानां वर्णनम् ।

६. गणेशस्य जन्मकथा ।

७. कार्तवीर्यस्य चरितम् ।

८. जामदग्न्यगणेशविवादः ।

९. श्रीकृष्णजन्म ।

१०. श्रीकृष्णस्य विविधबाल्यकुमारावस्थानां लीलानां वर्णनम्।

११. कंसादीनां वधः ।

१२. श्रीकृष्णस्य द्वारिकागमनविषयकं वर्णनम् ।

अन्ते च ब्रह्मवैवर्तकपुराणस्य श्रवणस्य मननस्य च फलमनेन प्रकारेण कथितं यद् –

**अलिखित्वेदं च यो दद्याद् माध्यां धेनुसमन्वितम् ।**

---

1 मत्स्यपुराणम्

**ब्रह्मलोकमवाप्नोति स मुक्तोज्ञानबन्धनात्**[१] ।।

२.१३.१२ लिङ्गपुराणम् ।

अस्य लिङ्गपुराणस्य भागद्वयमस्ति यथा –

१. पूर्वभागः ।

२. उत्तरभागः ।

लिङ्गपुराणेस्मिन् त्रिषष्टुत्तरैकशत (१६३) अध्यायाः सन्ति, तथा श्लोकानां संख्या एकादशसहस्र (११०००) परिमिता वर्तते । लिङ्गपुराणस्य परिचयमनेन पद्यमाध्यमेन मत्स्यपुराणं कथयति यद् –

**यत्राग्निलिङ्गमध्यस्थः प्राह देवो महेश्वरः ।**

**धर्मार्थकाममोक्षार्थमाग्नेयमधिकृत्य च ।।**

**कल्पान्ते लिङ्गमित्युक्तं पुराणं ब्रह्मणा स्वयम् ।**

**तदेकादशसाहस्रं हरमाहात्म्यसूचकम्**[२] ।।

२.१३.१२.१ लिङ्गपुराणस्य पूर्वभागः ।

१. योगविषयकमाख्यानम् ।

२. कल्पानां वर्णनम् ।

३. लिङ्गोत्पत्तिः ।

४. लिङ्गप्रतिष्ठा ।

५. वराहचरितस्य वर्णनम् ।

६. दक्षयज्ञस्य विध्वंसः ।

७. कामदहनम् ।

८. पार्वतीविवाहः ।

---

1 ब्रह्मवैवर्तपुराणम्

2 मत्स्यपुराणम्

९. शिवनृत्यादीनां वर्णनम् ।

२.१३.१२.२ लिङ्गपुराणस्य उत्तरभागः ।

१. विष्णुमाहात्म्यम् ।

२. अम्बरीषकथा ।

३. सनत्कुमारस्य नन्दीश्वरस्य कथा ।

४. शिवमाहात्म्यम् ।

५. सूर्यपूजाविधिः ।

६. व्रजेश्वरीमहाविद्या।

७. गायत्रीमहिमा ।

८. त्र्यम्बकस्य च कथा ।

अस्य लिङ्गपुराणस्यान्ते विशेषरूपेण वर्णिता वर्तते । अन्ते च लिङ्गपुराणस्य श्रवणस्य मननस्य च फलमनेन प्रकारेण कथितं यद्-

**यः पठेच्छृणुयाद्वापि लैङ्गं पापापहं नतः ।**

**स मुक्तयोगी लोकेस्मिन्नन्ते शिवपुरं व्रजेत् ।।**

**लिङ्गानुक्रमणीमेतां पठेद्यः शृणुयात्तथा ।**

**तावुभौ शिवभक्तौ तु लोकद्वितयभोगिनौ ।**

**जायेतां गिरिजाभर्तुः प्रासादान्नात्र संशयः[१] ।।**

२.१३.१३ वाराहपुराणम् ।

अस्य वाराहपुराणस्य भागद्वयमस्ति यथा -

१. पूर्वभागः ।

२. उत्तरभागः ।

[1] लिङ्गपुराणम्

अस्मिन् वाराहपुराणे अष्टादशोत्तरैकशत (११८) अध्यायाः सन्ति, तथा वाराहपुराणे श्लोकानां संख्या चतुर्विंशतिसहस्र (२४०००) परिमिता वर्तते । अस्य वाराहपुराणस्य परिचयमनेन पद्यमाध्यमेन मत्स्यपुराणं कथयति यद् –

**महावराहस्य पुनर्माहात्म्यमधिकृत्य च ।**
**विष्णुनाभिहितं क्षुण्ण्यै तद्वाराहमुच्यते।।**
**मानवस्य प्रसङ्गेन कल्पस्य मुनिसत्तमः ।**
**चतुर्विंशत्सहस्राणि तत्पुराणमिहोच्यते[1] ।।**

२.१३.१३.१ वाराहपुराणस्य पूर्वभागः ।

१. गौर्या उत्पत्तिवर्णनम् ।

२. सत्यतपसोराख्यानम् ।

३. महिषासुरवधः ।

४. श्वेतोपाख्यानम् ।

५. तीर्थानां माहात्म्यम् ।

६. यमलोकस्य वर्णनम् ।

७. कर्मविपाकवर्णनम् ।

८. गोकर्णस्य माहात्म्यस्य वर्णनम् ।

२.१३.१३.२ वाराहपुराणस्य उत्तरभागः ।

१. पुलस्त्यकुरुसंवादः ।

२. तीर्थानां विस्तारपूर्वकेण माहात्म्यस्य वर्णनम् ।

३. समेषां धर्माणां वर्णनम् ।

---

[1] मत्स्यपुराणम्

अन्ते च वाराहपुराणस्य श्रवणस्य मननस्य च फलमनेन प्रकारेण कथितं यद् –

**पठतां शृण्वताञ्चैव भगवद्भक्तिवर्धनम् ।**
**काञ्चनं गारुडं कृत्वा तिलधेनुसमन्वितम् ।।**
**लिखित्वैतच्च यो दद्याच्चैत्र्यां विप्राय भक्तितः ।**
**स लभेद् वैष्णवं धाम देवर्षिगणवन्दितः ।।**
**यो वानुक्रमणीमेतां शृणोत्यपि पठत्यपि ।**
**सोपि भक्तिं लभेद् विष्णौ संसारोच्छेदकारिणीम्[1] ।।**

२.१३.१४ स्कन्दपुराणम् ।

अष्टादशसु पुराणेषु स्कन्दपुराणग्रन्थोयं सर्वाधिकः बृहत्कायो ग्रन्थो वर्तते । यद्यपि पुराणमिदं शैवप्रधानमस्ति, तथापि सम्प्रदायान्तरस्य वर्णनं बहुविधं वर्तते । भारतवर्षस्य विभिन्नानां तीर्थस्नानां वर्णनत्वाद् भौगोलिकदृष्ट्या विशेषं पुराणस्य महत्त्वमस्ति । दक्षिणभारते स्कन्दपुराणस्यास्य विशेषतया सर्वाधिकः प्रचारः प्रसारश्च वर्तते । नारदीयपुराणस्य मतानुसारमस्य स्कन्दपुराणस्य सप्त खण्डा विद्यन्ते, तद्यथा –

१. महेश्वरखण्डः ।
२. वैष्णवखण्डः ।
३. ब्रह्मखण्डः ।
४. काशीखण्डः ।
५. अवन्तीखण्डः ।
६. नागरखण्डः ।

---
[1] वाराहपुराणम्

७. प्रभासखण्डः ।

एषु सप्तसु खण्डेषु मध्येवान्तरखण्डा सन्ति, वैष्णवखण्डे रेवाखण्डो वर्तते । सम्प्रति कलियुगे स्कन्दपुराणं विशेषं महत्त्वमादधाति । सम्पूर्णे भारतवर्षेस्य विशेषप्रचारतया 'श्रीसत्यनारायणव्रतकथा' इति नाम्नापि पुराणमिदं विख्यातमस्ति । मत्स्यपुराणस्य मतानुसारमस्मिन् स्कन्दपुराणे षट् संहिताः सन्ति, तद्यथा–

१. सनत्कुमारसंहिता ।

२. सूतसंहिता ।

३. शङ्करसंहिता ।

४. वैष्णवसंहिता ।

५. ब्राह्मसंहिता ।

६. सौरसंहिता ।

अस्मिन् स्कन्दपुराणे एकसप्तत्युत्तरषट्शताधिकैकसहस्र (१६७१) अध्यायाः सन्ति, तथा चास्मिन् श्लोकसंख्या एकाशीतिसहस्र (८१०००) परिमिता वर्तते, परन्तु वर्तमाने श्रीसत्यनारायणस्य कथा रेवाखण्डे वर्तते, तस्यानुसारं श्लोकानां संख्या चतुर्विंशतिसहस्र (२४०००) परिमिता वर्तते । अस्य स्कन्दपुराणस्य परिचयमनेन श्लोकमाध्यमेन मत्स्यपुराणं प्रस्तौति यद् –

**यत्र महेश्वरान् धर्मानधिकृत्य च षण्मुखः ।**
**कल्पे तत्पुरुषे वृत्तं चरितैरुपबृंहितम् ।।**
**स्कान्दं नाम पुराणं तद्वैष्णवं च प्रचक्षते ।**

**एकाशीतिसाहस्रं तु श्लोसंख्या निगद्यते**[१] ।।

स्कन्दपुराणस्य सप्तसु खण्डेषु प्रधानतया विषया एते प्रतिपादिताः सन्ति तद्यथा –

२.१३.१४.१ स्कन्दपुराणस्य महेश्वरखण्डः ।

१. महेश्वरखण्डे स्कन्दपुराणस्य माहात्म्यम् ।

२. केदारमाहात्म्यम् ।

३. दक्षकथा ।

४. समुद्रमन्थनम् ।

५. पार्वती–उपाख्यानम् ।

५. तारकयुद्धस्य वर्णनम् ।

६. पृथ्वीप्रादुर्भावः ।

७. महीसागरसंयोगः ।

८. महाकालकथा ।

९. अरुणाचलस्य माहात्म्यम् ।

१०. शोणाचलस्य वर्णनादिकं वर्णनम् ।

२.१३.१४.२ स्कन्दपुराणस्य वैष्णवखण्डः ।

१. कामलायाः पवित्रा कथा।

२. भारद्वाजमुनिकथानकम् ।

३. जैमिनिवृत्तान्तः ।

४. नीलकण्ठस्य वर्णनम् ।

५. दक्षिणामूर्तेरुपाख्यानम् ।

६. दशावतारकथा ।

---

[1] मत्स्यपुराणम्

७. नैवेद्यस्य माहात्म्यम् ।

२.१३.१४.३ स्कन्दपुराणस्य ब्रह्मखण्डः ।

१. गालवस्य तपश्चर्याया वर्णनम् ।

२. चक्रतीर्थादीनां नैकेषां तीर्थानां वर्णनम् ।

३. वर्णाश्रमस्य धर्मतत्त्वस्य च निरूपणम्।

४. तारकस्य वधोपायस्य कथनम् ।

५. भगवतः श्रीशङ्करस्य ताण्डवनृत्यस्य वर्णनम् ।

६. ज्ञानयोगादीनां वर्णनम् ।

२.१३.१४.४ स्कन्दपुराणस्य काशीखण्डः ।

१. काशीखण्डस्यात्यद्भुतं वर्णनम् ।

२. विन्ध्यनारदयोः संवादः ।

३. पतिव्रतायाः चरितम् ।

४. सप्तर्षिलोकानां तथा च ध्रुवस्य तपोलोकस्य सुन्दरं वर्णनम्

५. दुर्गाविजयकथा ।

६. ओङ्कारेश्वरस्य माहात्म्यम् ।

२.१३.१४.५ स्कन्दपुराणस्य अवन्तीखण्डः ।

१. महाकालस्य भगवतो माहात्म्यम् ।

२. उज्जयिनीपद्मावत्यमरावतीविशालेत्यादिनीनां पवित्रनगरीणां वर्णनम् ।

३. नीलगङ्गावीरेश्वरसरःकालभैरवादीनां तीर्थस्थलानामपि वर्णनम् ।

२.१३.१४.६ स्कन्दपुराणस्य नागरखण्डः ।

१. विश्वामित्रस्य महिमा ।

२. त्रिशङ्कुस्थितिः ।

३. हाटकेश्वरस्य माहात्म्यम् ।

४. वृत्रासुरस्य वधवर्णनम् ।

५. महर्षिजाबालिचरितस्य वर्णनम्।

६. वाराणसीद्वारिकावृन्दावनादीनां तीर्थस्थलानां महत्त्वम् ।

७. गङ्गानर्मदासरस्वतीत्यादिनीनां नदीनां मनोरमं वर्णनम् ।

२.१३.१४.७ स्कन्दपुराणस्य प्रभासखण्डः ।

१. सिद्धेश्वादीनां पञ्चानां रुद्राणां स्थापनावर्णनम् ।

२. वरारोधाजापालामङ्गलाललितेश्वरीत्यादिदेवतानां माहात्म्यस्य वर्णनम् ।

३. दुर्वासस उपाख्यानम् ।

४. चक्रतीर्थनृगतीर्थगोपीसरइत्यादीनां पवित्रस्थालानां वर्णनम्।

अन्ते च स्कन्दपुराणस्य श्रवणस्य मननस्य च फलमनेन प्रकारेण कथितं यद् -

**लिखित्वैतत्तु यो दद्याद् हेममूलसमाचितम् ।**
**माध्यं सत्कृत्य विप्राय स शैवे मोदते पदे [१] ।।**

२.१३.१५ वामनपुराणम् ।

वामनपुराणस्य द्वौ भागौ वर्तेते ।

१. पूर्वभागः ।

२. उत्तरभागः ।

---

[1] स्कन्दपुराणम्

नारदीयपुराणस्य मतानुसारमस्योत्तरभागस्य नाम 'बृहद् वामनम् ' इति वर्तते । अस्मिन् वामनपुराणे चतस्रः संहिताः सन्ति तद्यथा –

१. माहेश्वरीसंहिता ।

२. भागवतीसंहिता ।

३. सौरीसंहिता ।

४. गणेश्वरीसंहिता ।

एतासु चतसृषु संहितासु पञ्चनवति (९५) अध्यायाः सन्ति, तथा च श्लोकानां संख्या दशसहस्र (१००००) श्लोकपरिमिता वर्तते । अस्य वामनपुराणस्य परिचयमनेन श्लोकमाध्यमेन मत्स्यपुराणं प्रस्तौति यद् –

**त्रिविक्रमस्य माहात्म्यमधिकृत्य चतुर्मुखः ।**
**त्रिवर्गमब्रवीतश्च वामनं परिकीर्तितम् ।**
**पुराणं दशसाहस्रं कूर्मकल्यनुगं शिवम्[1] ।।**

चतुःसंहितायुतेस्मिन् वामनपुराणे प्राधान्यत्वेन विषया एते प्रतिपादिताः सन्ति तद्यथा –

१. पुराणविषयकः प्रश्नः ।

२. दक्षस्य यज्ञविध्वंसः ।

३. कुरुक्षेत्रस्य वर्णनम् ।

४. पार्वतीजन्मकथा ।

५. अन्धकासुरस्य वधः ।

[1] मत्स्यपुराणम्

६. प्रह्लादबलिसंवादः ।

७. माहेश्वर्यादिसंहितासु विभक्तानां तत्तद्देवतानां तद्भक्तानां संकीर्तनम्

अन्ते च वामनपुराणस्य श्रवणस्य मननस्य च फलमनेन प्रकारेण कथितं यद् –

**ये पठन्ति च शृण्वन्ति तेपि यान्ति परां गतिम् ।**
**लिखित्वैतत् पुराणं तु य शरद्विषुवेर्थयेत् ।।**
**विप्राय वेदविदुषे ध्रुवधेनुसमाचितम् ।**
**स समुद्धृत्य नरकान्नयेत्स्वर्गं पितॄन्स्वकान्।**
**देहान्ते भुक्तभोगासौ याति विष्णोः परं पदम्[१] ।।**

२.१३.१७ कूर्मपुराणम् ।

कूर्मपुराणस्य द्वौ भागौ वर्तेते ।

१. पूर्वभागः ।

२. उत्तरभागः ।

कूर्मपुराणस्योत्तरभागे चतस्रः संहिताः सन्ति तद्यथा –

१. ब्राह्मीसंहिता ।

२. भागवतीसंहिता ।

३. सौरीसंहिता ।

४. वैष्णवीसंहिता ।

तथा चोत्तरभागस्य द्वितीयायां भागवतीसंहितायां पञ्च पादाः सन्ति । कूर्मपुराणे नवनवतिः (९९) अध्यायाः सन्ति, एवं सप्तदशसहस्र (१७०००) श्लोकाः सन्ति । मत्स्यपुराणस्यानुसारं

---

[1] वामनपुराणम्

श्लोकानां संख्या अष्टादशसहस्र (१८०००) परिमिता वर्तते । अस्य कूर्मपुराणस्य परिचयमनेन श्लोकमाध्यमेन मत्स्यपुराणं प्रस्तौति यद् –

**यत्र धर्मार्थकामानां मोक्षस्य च रसातले ।**

**माहात्म्यं कथयामास कूर्मरूपो जनार्दन ॥**

**इन्द्रद्युम्नप्रसङ्गेन ऋषिभ्य शुक्रसन्निधौ ।**

**अष्टादश सहस्राणि लक्ष्मी कल्पानुसङ्गिनम्[१] ॥**

१. पुराणानामुपक्रमः ।

२. लक्ष्मीप्रद्युम्नोः संवादः ।

३. कूर्मर्षिगणानां कथा ।

४. कालसंख्या ।

५. भृगुवंशकथा ।

६. आत्रेयवंशकथनम् ।

७. युगधर्मस्य माहात्म्यम् ।

८. वाराणस्या वर्णनम् ।

९. देवशाखानां निरूपणम् ।

१०. व्यासगीता ।

११. नानातीर्थानां माहात्म्यम् ।

१२. ब्राह्मणानां धर्मवृत्त्यादिवर्णनम् ।

अन्ते च कूर्मपुराणस्य श्रवणस्य मननस्य च फलमनेन प्रकारेण कथितं यद् –

**एतत् कूर्मपुराणन्तु चतुर्वर्गफलप्रदम् ।**

**पठतां श्रृण्वतां नॄणां सर्वोत्कृष्टगतिप्रदम् ॥**

---

[1] मत्स्यपुराणम्

**लिखित्वैतत्तु यो भक्त्या हेमकूर्मसमन्वितम् ।**

**ब्राह्मणाय च यो दद्यात् स याति परमां गतिम्[1] ।।**

२.१३.१८ मत्स्यपुराणम् ।

चतुर्दशसहस्र (१४०००) पद्यपरिमिते मत्स्यपुराणे देवीभागवतस्य पुराणस्यानुसारेण एकोनविंशतिसहस्र (१९०००) परिमिताः श्लोकाः, परन्तु सम्प्रति समुपलब्धे मत्स्यपुराणे त्रयोदशसहस्रपरिमिता एव दृश्यन्ते । अस्य मत्स्यपुराणस्य परिचयमनेन श्लोकमाध्यमेन मत्स्यपुराणस्य श्लोकोयं कथयति यद् -

**श्रुतीनां यत्र कल्पादौ प्रवृत्यर्थं जनार्दनः ।**

**मत्स्यरूपेण मनवे नरसिंहोपवर्णनम् ।।**

**अधिकृत्याब्रवीत् सप्तकल्पवृत्तं मुनीश्वराः ।**

**तन्मात्स्यामिति जानीध्वं सहस्राणि चतुर्दश[2] ।।**

१. मनुमत्स्यसंवादः ।

२. जगदुत्पत्तिप्रलयवर्णनम् ।

३. ब्रह्मोत्पत्तिः ।

४. वेदप्रादुर्भावः ।

५. मरीचिनारदाद्युत्पत्तिः ।

६. आदिसृष्टिविवरणम् ।

७. मानुषी सृष्टिः ।

८. दैवी सृष्टिः ।

९. काश्यपान्वयवृत्तान्तः ।

---

[1] मत्स्यपुराणम्

[2] मत्स्यपुराणम्

१०. दितिकथाप्रसङ्गे मदनद्वादशीमाहात्म्यम् ।

११. मरुतामुत्पत्तिः ।

१२. लोकपालाभिषेचनम् ।

१३. मन्वन्तरानुकीर्तनम् ।

१४. वेन्यचरितम् ।

१५. सूर्यवंशनिरूपणम् ।

१६. अश्विनोरुत्पत्तिः ।

१७. बुधप्रसङ्गे नृपालोत्पत्तिः ।

१८. उत्कलादित्रिपुत्रोत्पत्तिः ।

१९. इक्ष्वाकुवंशवर्णनम् ।

२०. वैराजपितृवंशवर्णनप्रसङ्गे गौरीशतनामकीर्तनम् ।

२१. अग्निष्वात्तपितृवर्णनम् ।

२२. बर्हिषत्पितृवंशविवरणम् ।

२३. श्राद्धकल्पे पिपीलिकेतिहासकथा ।

२४. पितृमाहात्म्यम् ।

२५. पिण्डीकरणकल्पः ।

२६. सोमवंशवर्णनम् ।

२७. चन्द्रबृहस्पतिकलहः ।

२८. पुरुवंशस्य ययातेश्चरितम् ।

२९. यदुवंशकीर्तनप्रसङ्गे कार्तवीर्यकथा ।

३०. वृष्णिवंशस्यमन्तकमणिकथा ।

३१. कृष्णचरितम् ।

३२. श्रीकृष्णस्य षोडशसहस्र (१६०००) स्त्रीणां पुत्राणाञ्च नामादिकीर्तनम्

३३. दशावताराणां वर्णनम् ।

३४. देवासुरकथा ।

३५. तुर्वप्रभृतिवंशवर्णनम् ।

३६. इन्द्रबृहस्पतिराजधर्मसंवादः ।

३७. शिवपार्वतीविवाहकार्तिकेयोत्पत्तिः ।

३८. हिरण्यकशिपुवधप्रसङ्गे नरसिंहावतारस्य कीर्तनम् ।

३९. दानमाहात्म्यम् ।

४०. सावित्रीसत्यवतोः चरितम् ।

४१. प्रवरानुकीर्तने

भृगु-आङ्गिरस-अत्रि-विश्वामित्रवशिष्ठपराशर-
कश्यप-द्वैपायनादीनां वंशवर्णनम् ।

४२. भविष्यकीर्तनपुरस्सरं मत्स्यान्तर्धानम् ।

अन्ते च मत्स्यपुराणस्य श्रवणस्य मननस्य च फलमनेन प्रकारेण कथितं यद् -

**एतत्पवित्रमायुष्यमेतत् कीर्तिविवर्धनम् ।**
**एतत्पवित्रं कल्याणं महापातहरं शुभम् ॥**
**अस्मात्पुराणादपि पादमेकं पठेत्तु यः सोपि विमुक्तपापः ।**
**नारायणाख्यं पदमेति नूनमनङ्गवद्दिव्यसुखानि भुङ्क्ते[१]॥**

---
1 मत्स्यपुराणम्

२.१३.१९ गरुडपुराणम् ।

गरुडपुराणस्य खण्डौ द्वौ वर्तेते ।

१. पूर्वखण्डः ।

२. उत्तरखण्डः ।

अस्योत्तरखण्डे व्रतकल्पमपि वर्तते, यस्मिन् शरीरत्यागानन्तरं परलोकगामिनो जीवस्य शुभाशुभकर्मणामनुसारं नानाप्रकारकानां यातनानां रोचकतया वर्णनमस्ति । अस्मिन् अष्टादशोत्तरत्रिशत (३१८) अध्यायाः सन्ति, तथा च नारदीयपुराणस्यानुसारं श्लोकानाम् एकोनविंशतिसहस्र (१९०००) संख्या वर्तते, परन्तु मत्स्यस्य पुराणस्यानुसारम् अष्टादशसहस्र (१८०००) श्लोकानां संख्या वर्तते । अस्य मत्स्यपुराणस्य परिचयमनेन श्लोकमाध्यमेन मत्स्यपुराणस्य श्लोकोयं कथयति यद् -

**यदा च गरुडे कल्पे विश्वाण्डाद् गरुडोद्भवम् ।**

**अधिकृत्याब्रवीद् विष्णुं गारुडं तदिहोच्यते।**

**तदष्टादशकं चैव सहस्राणीह कथ्यते।।**

**गरुडपुराणे खण्डौ द्वौ वर्तेते, सम्प्रति तत्र मुख्या विषयाः** निम्नलिखिताः सन्ति यद् -

२.१३.१९.१ गरुडपुराणे पूर्वखण्डः ।

१. पुराणानामुपक्रमः ।

२. संक्षेपेण सृष्टिवर्णनम् ।

३. सूर्यादीनां देवानां पूजनविधिः ।

४. योगाभ्यासेन परमात्मनो ध्यानवर्णनम्।

५. सामुद्रिकशास्त्रस्य वर्णनम् ।

६. स्वरज्ञानस्य वर्णनम् ।

७. आयुर्वेदस्य वर्णनम् ।

८. छन्दःशास्त्रस्य वर्णनम् ।

९. श्राद्धादिकल्पानां सुन्दरतया वर्णनम् ।

२.१३.१९.२ गरुडपुराणे उत्तरखण्डः ।

१. और्ध्वदेहिकक्रियाया वर्णनम् ।

२. यमलोकमार्गस्य वर्णनम् ।

३. धर्मराजस्य वैभववर्णनम् ।

४. प्रेतानां चरितम् ।

५. प्रेतत्वादुद्धारोपायस्य वर्णनम् ।

६. मृत्योः पूर्वं क्रियाकथनम् ।

७. विविधानां कर्मणां विपाकनिरूपणम् ।

८. कृत्याकृत्यविचाराणां वर्णनम् ।

९. स्वर्गस्य सौख्यस्य वर्णनम् ।

अन्ते च गरुडपुराणस्य श्रवणस्य मननस्य च फलमनेन प्रकारेण कथितं यद् –

**कीर्तितं पापशमनं पठतां शृण्वतां नृणाम् ।**
**लिखितत्वेतत्पुराणं तु विदुषे यः प्रयच्छति ।**
**सौवर्णहंसयुग्माद्यं विप्राय स दिवं व्रजेत्**[1] **।।**

२.१३.२० ब्रह्माण्डपुराणम् ।

ब्रह्माण्डपुराणे चत्वारः पादाः सन्ति तद्यथा –

१. प्रक्रियापादः ।

---

[1] मत्स्यपुराणम्

२. अनुषङ्गपादः ।

३. उपाद्घातपादः ।

४. उपसंहारपादः ।

अस्मिन् एकषष्ट्युत्तरैकशत (१६१) अध्यायाः सन्ति, तथा च नारदीयपुराणस्य मतानुसारं श्लोकानां संख्या द्वादशसहस्र (१२०००) परिमिता वर्तते, परन्तु मत्स्यपुराणस्य मतानुसारं श्लोका द्विदशाधिकद्वादशसहस्रं (१२२००) वर्तन्ते । यथा ब्रह्मपुराणमादिपुराणं कथयन्ति, तथैव पुराणमिदं सर्वेभ्यः पुराणेभ्योन्तिमं पुराणमस्ति । मध्ये च ब्रह्म वैवर्तपुराणमस्ति, अतः पुराणे कथितं यद् –

आदावन्ते च मध्ये च हरिः सर्वत्र गीयते[1] ।

अस्य ब्रह्माण्डपुराणस्य परिचयमनेन श्लोकमाध्यमेन मत्स्यपुराणस्य श्लोकोयं कथयति यद् –

**ब्रह्मा ब्रह्माण्डमाहात्म्यमधिकृत्याब्रवीत् पुनः।**
**तच्च द्वादशसाहस्रं ब्रह्माण्डं द्विशताधिकम् ।।**
**भविष्याणां च कल्पानां श्रूयते यत्र विस्तरः ।**
**तद् ब्रह्माण्डपुराणं च ब्रह्मणा सूदाहृतम्[2] ।।**

चतुःपादयुतेस्मिन् ब्रह्माण्डपुराणे सम्प्रति तत्र मुख्या विषयाः निम्नलिखिताः सन्ति यद् –

१. हिरण्यगर्भोत्पत्तिः ।

२. लोकनिर्माणम् ।

३. कल्पानां मन्वन्तराणामाख्यानम् ।

---

[1] ब्रह्माण्डपुराणम्

[2] मत्स्यपुराणम्

४. जम्ब्वादीनां सप्तद्वीपानां वर्णनम् ।

५. वैवश्वतोत्पत्तिः ।

६. इक्ष्वाकुवंशोत्पत्तिः ।

७. ययातिचरितचित्रणम् ।

८. कार्तवीर्यादीनां वर्णनम् ।

९. भाविमनूनां वर्णनम् ।

१०. चतुर्दशश्लोकानां वर्णनम् ।

ब्रह्माण्डपुराणमिदं समेषां पुराणानां सारस्वरूपमस्ति । अन्ते च ब्रह्माण्डपुराणस्य श्रवणस्य मननस्य च फलमनेन प्रकारेण कथितं यद् –

**य इदं कीर्तयेद् वत्स ! शृणोति च समाहितः ।**
**स विधूयेह पापानि याति लोकमनामयम् ।।**
**लिखित्वैतत् पुराणन्तु स्वर्णसिंहासनस्थितम्।**
**पात्रेणाच्छादितं यस्तु ब्राह्मणाय प्रयच्छति ।।**
**स याति ब्रह्मणो लोकं नात्र कार्या विचारणा ।**
**अष्टादशपुराणानां च नामनिर्देशपूर्वकम् ।**
**संक्षिप्ता दिग् विर्निष्टा ग्रन्थेस्मिन् विदुषां मुदे[१] ।।**

अनेन प्रकारेण समेषां पुराणानां वर्ण्यविषयं संक्षेपेण प्रस्तूय उपप्रकरणमिदमत्रैव समाप्यते ।

२.१४ उपसंहारः ।

**यत्प्रभापटलोद्भासा भासतेद्यापि भारतम् ।**
**दिव्यं तत्संस्कृतं ज्योतिरासंसारं प्रकाशते ।।**

---

1 ब्रह्माण्डपुराणम्

**धन्यं भारतभूतलं सुललितं सारस्वतं मन्दिरम्**
**धन्या संस्कृतवाक् सुधेव मधुरा गीर्वाणसंसेविता।**
**धन्याश्च प्रतिभायुताः सुकवयः पाण्डित्यसम्मण्डिताः**
**तेषां सूक्तिसुधारसाः क्षितितले दीव्यात्समाः शाश्वतीः ।।**

एतेषां समेषां पुराणानां ज्ञानेनान्वितं यत्र भारतमिति नाम श्रुत्वैव सम्पूर्णं विश्वमाकर्षति, तद्भारतम् , भारतन्नाम भायां रतमिति भारतम् । समस्तस्यापि महीमण्डलस्य विद्यमानेषु विविधेषु देशेषु मूर्धन्योयं भारतवर्षः । भारतवासिनां चरित्रसुगन्धेन जनमनांसि मोदयन् राजते । यस्मिन् काले सभ्यमूर्धन्यानां देशवासिनां पूर्वजा दिगम्बरा आसन् , तस्मिन्नपि काले परमपवित्रं साधुचरित्रं सुसंस्कृतिसंस्कृतं जीवनं यापयन्ति स्म भारतवासिनः । क्रमशो जाते सभ्यताप्रसारेस्यैव देशस्य संस्कृतिप्रकाशे दृष्टा लोकजीवनयोग्या सुरम्या सरणिरन्यदेशीयैः निवासिभिरिति मनुस्मृतिकारो मनुः भारतवर्षस्य प्रशंसामगायत् , तामेव प्रशंसां सर्वे गायन्तः कथयन्ति यद् –

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः[१] ।।**

एवं च समस्तेपि संसारे मूर्धन्यतामापन्नोयं देशः प्राचीनकालत एव ‘विश्वगुरुः’ इति भव्योपाधेः विभूषित आसीत् । स एवायं देशो यत्र च संसारं निःसारं मन्यमानाः प्रातःस्मरणीया ऋषयो महर्षयो मनुयश्च परःशतानि वर्षाणि तपांसि तप्त्वा तत्परमं ज्योतिः प्राप्तवन्तः । तेषां धर्मः समृद्धः सुरद्रुमः शोभते, यस्य

---
[1] मनुस्मृतिः

शाखामात्रा एव गण्यन्ते विविधा धर्माः । एवं च धर्म - सदाचार - संस्कृति - सभ्यतादिभिः सर्वाग्रगण्यो वर्ततेस्मदीयो भारतवर्षः ।

साहित्यदृष्ट्यापि भारतवर्षोयं सर्वान् देशान् अतिशेते । अस्मिन् देशे न केवलं पुरुषा एव, अपि तु विराजन्ते स्म मैत्रेयीसदृशब्रह्मविचारदक्षाः, शारदासदृशा वैदुष्यमण्डिताः, सीतासदृशाः पवित्राचरणा महापुरुषाः । हिमवत्प्रहरिणी गङ्गा - यमुना - सरस्वतीशोभिनी सस्यश्यामला विविधजनमोदिनी मध्यभागमोहिनी विन्ध्यादिपर्वतमालाशोभिनी सततरत्नाकरशोभिनी भारतभूमिनान्यं निर्देशनमपेक्षते स्वसाम्यार्थम् । एतामेव अनिर्वाच्यां सुषमा - सुधा नयनपुटैः निभाल्य अनेकैर्भाविकैः कविवरैर्यो अस्याश्चरणेषु कल्पनासुरभिः पद्यप्रसूनाञ्जलिः सश्रद्धं समर्पितः, स एव अद्यापि प्रीणाति साहित्यप्रणयिनां चेतांसि । यामेव समाश्रित्य समुद्भासिता संस्कृतिः सर्वानेव देशान् पुनाति । यया प्रदर्शिता सदाचारसरणिरेव सर्वासु सरणिषु राजमार्गतामालम्बते । यस्या विनिर्गतं सत्साहित्यं सर्वानेव साहित्यान् अतिशेते । यस्याः पादप्रक्षालने नियुक्तः क्षारपानीयः समुद्रोपि रत्नाकर इति भव्यान्वयं भजते । यस्यां विविधा मानवा जननीक्रोडसुखमनुभवन्तो निर्बाधं जीवनयात्रां सम्पादयन्ति । तस्या भारतभुवो महिमा सर्वातिशायी वर्तत एव । अत एव भारतभुवं स्तुवन् श्रीभर्तृहरिर्गायति यद् -

**गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे ।**

**स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयो मनुजाः सुरत्वात्[1] ।।**

---

[1] नीतिशतकम्

तामेव भारतभुवं संस्तूयमानेन एम. एस. युनिवर्सिटीद्वारा (बडौदानगरम्) इति विश्वविद्यालयेन स्वीकृतं ''पुराणेषु सांख्ययोगवेदान्तविमर्शः' इति विषयमवलम्ब्य मया मया द्वितीयं प्रकरणमत्रैव समाप्यते ।